श्रीः ।

तर्कसंग्रहः ।

श्रीवृन्दावननिवासिसुप्रसिद्धपदवाक्यप्रमाणपारा-
वारीणश्रीमत्त्रय्यन्तपथप्रतिष्ठापनदेशिकश्री-
गोवर्धनरङ्गाचार्यस्वामिभिः शीघ्रं न्याय-
शास्त्रपरिभाषाबुभुत्सूनां हिताय प्रणीतया
लघुबोधिनीत्याख्यया व्याख्यया
समलङ्कृतः ।

तद्गुणग्राहिणा तच्छिष्यताङ्गेन कुरुक्षेत्रान्तर्गत-
फतेपुरलब्धजानीविहाणवास्तव्यमहावनशास्त्रिणा
"लक्ष्मीवेङ्कटेश्वर" मुद्रणागारे
मुद्रयित्वा प्रसिद्धिं नीतः ।

गंगाविष्णु श्रीकृष्णदास
लक्ष्मीवेङ्कटेश्वर मुद्रणयन्त्रम्
कल्याण-मुंबई.

शकाब्दाः १८१९, संवत् १९५०.

श्रीः ।

तर्कसंग्रहः ।

श्रीवृन्दावननिवासिसुप्रसिद्धपदवाक्य-
प्रमाणपारावारीणश्रीमत्त्रय्यन्तपथप्र-
तिष्ठापनदेशिकश्रीगोवर्धनरङ्गाचा-
र्यस्वामिभिः शीघ्रं न्यायशास्त्र-
परिभाषाबुभुत्सूनां हिताय
प्रणीतया लघुबोधिनीत्या-
ख्यया व्याख्यया
समलङ्कृतः ।

तद्गुणग्राहिणा तच्छिष्यताङ्गतेन कुरुक्षेत्रान्तर्गत-
फतेपुरलब्धजनिबिहाणीवास्तव्यमहावन
शास्त्रिणा "लक्ष्मीवेङ्कटेश्वर"
मुद्रणागारे प्रसिद्धिं नीतः ।

गंगाविष्णु श्रीकृष्णदास
लक्ष्मीवेङ्कटेश्वर मुद्रणयन्त्रम्
कल्याण—(मुंबई)

शकाब्दाः १८१५ संवत् १९५०

तर्कसंग्रहस्य शुद्धिपत्रम्।

पृष्ठम्.	पङ्क्तिः.	अशुद्धम्.	शुद्धम्.
१	१८	वह्वायास०	वह्वायास०
२	१६	विशिपृयोः	विशिष्टयोः
३	६	ऋगतौ	ऋगतौ.
३	१०	सप्तदार्थाः	सप्तपदार्थाः.
४	२१	हस्तपुकसंयोगे	हस्तपुस्तकसंयोगे
६	१३	समावायः	समवायः
११	१२	रूपरहितेति	रूपरहित इति.
११	२१	सचैकोपीति.	सएकोपीति.
१३	८	च्छेदकस्यं	च्छेदकस्य.
१४	३	एतद्विशिष्ट०	एतद्विशिष्ट०
१७	४	त्रदिपदेन	त्रादिपदेन.
२१	७	उत्पतिद०	उत्पत्तिद०
२१	८	उत्पतिद०	उत्पत्तिद०
२५	२१	समबायिका०	समवायिका०
२३	१२	तविभजते	तंविभजते
२६	१०	वृतीति	वृत्तीति.
२६	२०	तच्चद्विविधम्	तद्विविधम्.
२६	२२	कालिक्कत्वम.	कालिकत्वम्.
२६	२२	ग्राह्यम	ग्राह्यम्.

शुद्धिपत्रम् ।

पृष्ठम्.	पङ्क्तिः.	अशुद्धम्.	शुद्धम्.
२८	११	जातिमत्वम्	जातिमत्त्वम्.
२९	७	सद्विविधेति	सद्विविधइति.
३२	१२	तज्जन्यजजनकत्वं	तज्जन्यजनकत्वं
३२	१७	कार्येति	कार्यमिति
३४	१७	कास्णं	कारणं
३७	५	शब्दत्वसा०	शब्दसाक्षा०
३९	१७	वृत्तित्त्वम्	वृत्तित्वम्
३९	२१	सविषयकत्त्व०	सविषयकत्व०
४२	१९	वृत्तित्त्वस्वरू०	वृत्तित्वस्वरू०
४४	१९	अवच्छेक०	अवच्छेदक०
४६	९	लिङ्गाव्	लिङ्गात्.
४७	२१	इत्यर्यः	इत्यर्थः
४७	२४	विक्षेष्यक.	विशेष्यक०
४८	१३	वन्हौ	वह्नौ.
५८	१८	हृतुतावच्छदेकम्.	हेतुतावच्छेदकम्.
६४	१२	साहितस्य	सहितस्य
६८	१२	नानाधर्गवै०	नानाधर्मवै०
७१	२०	संस्कारमिति	संस्कार इति
७२	१	स्थितिस्थापकमा०	स्थितिस्थापकमाह.

श्रीः ।

तर्कसंग्रहः

लघुबोधिनीसमेतः ।

निधायहृदिविश्वेशंविधायगुरुवन्दनम् ॥
बालानांसुखबोधायक्रियतेतर्कसंग्रहः ॥१॥

॥ श्रीलक्ष्मणार्याय नमः ॥ ॐ नमो विघ्ननिवर्तकाय ॥ नत्वा श्रीमद्धयग्रीवं सर्वविद्याधिदैवतम् ॥ कुर्वे बालप्रबोधार्थं न्यायार्थलघुबोधिनीम् ॥ १ ॥ चिकीर्षितस्य ग्रन्थस्य निर्विघ्नसमाप्तिप्रयोजनं शिष्टाचरितं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नन् शिष्यावधानार्थं चिकीर्षितं प्रतिजानीते— निधायेति । विश्वेशं जगन्नियन्तारं जगद्रक्षकमितियावत् इदं सृष्टिसंहारयोरप्युपलक्षणं निधाय ध्यात्वा गुरुवन्दनम् विद्यागुरुवन्दनम् । तर्कसंग्रहः तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः द्रव्यादिपदार्थाः तेषां संग्रहः संक्षेपेण स्वरूपकथनं क्रियते इत्यन्वयः । ननु "प्रयोजनमनुद्दिश्यन मन्दोपि प्रवर्तते" इति न्यायादेतद्ग्रन्थविषयकप्रवृत्तिरसंगतेत्यत आह—सुखबोधायेति। सुखेनानायासेन बोधायेत्यर्थः। अनेन स्वीयग्रन्थजन्यज्ञानस्य किरणावल्यादिबह्वायाससाध्यप्राचीननिबन्धाभ्यासजन्यज्ञानाद्व्यावृत्तिरुक्ता । ननु

---

१ अवश्यकर्तव्यत्वप्रकारकज्ञानानुकूलव्यापारः प्रतिपूर्वकज्ञाधात्वर्थो ज्ञेयः ।

बुद्धिकुशलानां प्राचीनग्रन्थाभ्यासे कोवा प्रयासः अत आह—बालानामिति । द्रव्यादिपदार्थानभिज्ञानामित्यर्थः । अतिसूक्ष्मयुक्तिकेषु तेषु तेषां प्रवेशो न स्यादिति भावः अत्र बालशब्देन ग्रहणधारणापटव उच्यन्ते नतु स्तनंधयाः तेषामनेनापि ग्रन्थेन बोधासंभवात् । केचित्तु सुखबोधायेति । सुखाय बोधायेत्यर्थः सुखशब्देन दुःखध्वंस उच्यते सच मोक्षः षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः शरीरं सुखं दुःखं चेत्येकविंशतिदुःखध्वंसो मोक्ष इति हि सिद्धान्तः । एवमस्य ग्रन्थस्य मोक्षजनकज्ञानपरत्वे संभवति अन्यार्थकल्पनमसंगतमित्याहुः ।

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः ।

पदार्थान् विभजते— द्रव्येति । ननु विभागस्य

---

१ एकविंशतिदुःखान्तर्गतयोः मनःश्रवणेन्द्रिययोः नित्यत्वेपि यद्रूपविशिष्टयोः तयोः ज्ञानद्वारा दुःखहेतुतया दुःखरूपत्वम् तद्रूपनाशेन विशेष्यांशे नाश उपचर्यते " शरीरी नष्टः " इतिवत् तेन न एकविंशतिदुःखध्वंसकथनासंगतिः ।

२ इह द्वितीयायाः विषयत्वमर्थः सामान्यधर्मव्याप्याऽवान्तरधर्मप्रकारकज्ञानानुकूलव्यापारः विपूर्वकभजधात्वर्थः आख्यातस्य लट्त्वतिङ्त्वैकवचनत्वरूपैः कालकृतिसंख्यारूपार्थाः तथाच पदार्थनिष्ठा या विषयता तादृशविषयतानिरूपकं यत् पदार्थत्वव्याप्यद्रव्यत्वादिरूपाऽवान्तरधर्मप्रकारकं ज्ञानं तदनुकूलव्यापारानुकूलवर्तमानकालिककृतिमान् एकत्वविशिष्टोऽन्नंभट्ट इति बोधः । एवं बोध उत्तरत्रापि ज्ञेयः ।

सामान्यलक्षणकथनपूर्वकत्वनियमात् अत्र पदार्थसामान्यलक्षणानुक्तेः विभागोऽनुपपन्न इति चेन्न तर्कसंग्रह इत्यत्रोक्तव्युत्पत्त्या ज्ञेयत्वं पदार्थसामान्यलक्षणमित्युक्तत्वात् यद्वा विभागवाक्यस्थपदार्थशब्देन पदस्यार्थः पदार्थः ऋगताविति धातोर्निष्पन्नस्यार्थशब्दस्य गत्यर्थकानां बुद्ध्यर्थकत्वात् ज्ञानविषयत्वमर्थः संबन्धसामान्यवाचकषष्ठ्याः जन्यत्वमर्थः अतः पदजन्यप्रतीतिविषयत्वं पदार्थसामान्यलक्षणमित्युच्यते अत्रापि पदजन्येति विशेषणस्य प्रयोजनाभावात् ज्ञानविषयत्वं लक्षणमित्येवोक्तम् । सप्तपदार्था इति। सप्तत्वसंख्याकाः पदार्था इत्यर्थः। ननु सप्तग्रहणं व्यर्थं प्रत्येकं द्रव्यादिगतैकत्वमादाय न्यूनसंख्याव्यवच्छेदात् अनुक्तेरेवाधिकसंख्याव्यवच्छेदाच्चेति चेन्न पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति झटिति व्याप्तिलाभाय सप्तग्रहणात् उद्देश्यविधेयभावस्थले असति बाधके विधेये विधेयसंसर्गे वोद्देश्यतावच्छेदकव्यापकत्वं गृह्यते इति नियमाद्व्याप्तिलाभः।

तत्र द्रव्याणि। पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव।

प्रथमोद्दिष्टं द्रव्यं विभजते—तत्रेति । गुणवत्त्वं द्र-

---

१ एतन्नियमबीजं तु अवान्तरधर्मप्रकारकजिज्ञासां प्रति सामान्यधर्मप्रकारकज्ञानस्य हेतुत्वम् ।

न्यसामान्यलक्षणं बोध्यम् अत्राव्यवहितपूर्वोपस्थितपराम-र्शिना तच्छब्देन द्रव्यादयः परामृश्यन्ते त्वल्प्रत्ययस्य घट-कत्वमर्थः द्रव्यगुणादिघटकीभूतानि द्रव्याणीति यावत् ।

रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाऽपरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माऽधर्मसंस्काराश्चतुर्विंशतिगुणाः ।

गुणान् विभजते—रूपेति ।[1] द्रव्यकर्मावृत्तिजातिमत्त्वं गुणसामान्यलक्षणं बोध्यम् अत्रापि संख्याग्रहणं पूर्ववद्बोध्यम् एवमुत्तरत्रापि ।

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि ।

कर्म विभजते—उत्क्षेपणेति ।[2] संयोगविभागाऽसमवायिकारणत्वं कर्मसामान्यलक्षणं बोध्यं भ्रमणरेचनस्यन्दनोर्ध्वज्वलनतिर्यग्गमनानां गमनेन्तर्भावान्न पञ्चधा विभागोऽनुपपन्नः ।

---

१ द्रव्याऽवृत्तिः कर्माऽवृत्तिश्च या जातिः तद्वत्त्वमित्यर्थः यथाश्रुते द्रव्यकर्मोभयावृत्तिद्रव्यत्वादिजातिमादाय द्रव्ये कर्मणि चातिव्याप्तेः ।

२ कायपुस्तकसंयोगाऽसमवायिकारणहस्तपुकसंयोगे कायपुस्तकविभागाऽसमवायिकारणहस्तपुस्तकविभागे अतिव्याप्तिवारणाय उभयोपादानम् ।

परमपरं चेति द्विविधं सामान्यम् ।

सामान्यं विभजते— परमपरमिति । नित्यत्वे सत्यनेकसमवेतत्वं सामान्यलक्षणम् लक्षणस्य त्रीणि दूषणानि अव्याप्तिरतिव्याप्तिरसंभवश्च तत्राव्याप्तिः लक्ष्यैकदेशावृत्तित्वम् यथा गोः कपिलत्वं लक्षणमित्युक्ते लक्ष्या गौः तत्रैकदेशः श्वेतगवादिस्तत्र कपिलत्वस्यासत्त्वादव्याप्तिः । अलक्ष्यवृत्तित्वमतिव्याप्तिः यथा गोः शृङ्गित्वं लक्षणमित्युक्ते लक्ष्या गौः अलक्ष्यं महिषादिः तत्र शृङ्गित्वस्य सत्त्वादतिव्याप्तिः । लक्ष्यमात्रावृत्तित्वमसंभवः यथा गोरेकशफत्वं लक्षणमित्युक्ते लक्ष्या गौः गोमात्रस्यैकशफत्वाभावादसंभवः । एतद्दूषणत्रयरहितो धर्मो लक्षणं सच गोः सास्नादिः तथाच नित्यत्वं सामान्यलक्षणमित्युक्तौ गगनादावतिव्याप्तिरतो विशेष्यदलं तावन्मात्रोक्तौ संयोगादावतिव्याप्तिरतोविशेषणम् अनेकवृत्तित्वमित्युक्तेऽत्यन्ताभावेऽतिव्याप्तिरतः समवेतत्वमिति समवेतत्वं समवायसंबन्धेन वृत्तित्वं तच्चात्यन्ताभावे नास्ति अवयवावयविनोर्गुणगु-

---

१ अनेकत्वं च न तावदेकत्वसंख्याभिन्नसंख्यावत्त्वं गुणेगुणानङ्गीकारस्य सिद्धान्तसिद्धतया तस्य गुणादावसत्त्वेन तत्समवेतत्वस्य गुणत्वादावसत्त्वादव्याप्तेः अपितु स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तित्वरूपोभयसंबन्धेन भेदविशिष्टत्वम् समवेतत्वपदं तु उक्तसंबन्धबोधकम् ।

णिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्विशेषनित्यद्रव्ययोश्च समवायात् तथैव वक्ष्यते इति सामान्यलक्षणं सुस्थितम् । द्विविधमिति । द्वौ द्वित्वसंख्याविशिष्टौ विभाजकधर्मौ यस्य तथोक्तम् अत्र परापरशब्दयोर्भावप्रधाननिर्देशः तदर्थयोरितिशब्दार्थाभेदेन विधशब्दार्थविभाजकधर्मेऽन्वयः तथाच परत्वापरत्वाभिन्नद्वित्वसंख्याविशिष्टविभाजकधर्मान्यतरवत्सामान्यमिति वाक्यार्थः एवमुत्तरत्रापि ।

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ।
समवायस्त्वेक एव ।

विशेषं विभजते-नित्यद्रव्येति । अनित्यद्रव्यवृत्त्यवृत्तिपदार्थविभाजकोपाधिमत्त्वं विशेषलक्षणं बोध्यम् । समवायस्य भेदाभावादाह—समवायस्त्वेक एवेति । नित्यसंबन्धत्वं समवायलक्षणम् ।

अभावश्चतुर्विधः । प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।

अभावं विभजते—अभाव इति । भावभिन्नत्वमभावलक्षणं सामान्यविभागवाक्यवदत्रापि वाक्यार्थो ज्ञेयः ।

---

१ अनित्यानि यानि द्रव्याणि द्व्यणुकादीनि तेषु वर्तमानाः ये द्रव्यगुणादयः तदवृत्तिः यः विशेषत्वरूपपदार्थविभाजकोपाधिः तद्वत्त्वस्य लक्ष्ये सत्त्वाल्लक्षणसंगतिः ।

तत्र गन्धवती पृथिवी । सा द्विविधा । नित्याऽनित्या च । नित्या परमाणुरूपा अनित्या कार्यरूपा । सा पुनस्त्रिविधा । शरीरेन्द्रियविषयभेदात् ।

शरीरमस्मदादीनाम् इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति । विषयो मृत्पाषाणादिः।

पृथिव्यादिपदार्थान्निरूपयन्नत्र प्रथमोद्दिष्टां पृथिवीं निरूपयति तत्रेति।अत्र तच्छब्देनाव्यवहितपूर्वोपस्थितपृथिव्याद्यन्योन्याभावान्ताः परामृश्यन्ते तथाच पृथिव्याद्यन्योन्याभावान्तर्घटकीभूतेत्यर्थः । गन्धवती पृथिवीति।पृथिवी लक्ष्या गन्धवत्त्वं लक्षणं पृथिवीत्वं लक्ष्यतावच्छेदकं यद्धर्मावच्छिन्नं लक्ष्यं स धर्मो लक्ष्यतावच्छेदक इति नियमात् पृथिवीनिष्ठा लक्ष्यता पृथिवीत्वावच्छिन्ना यो यस्यामवच्छेदकः सा तदवच्छिन्नेति नियमात् समवायसंबन्धेन गन्धवत्त्वं लक्षणं तेन कालिकसंबन्धेन सर्वाधारे काले गन्धवत्त्वेपि नातिव्याप्तिः । पृथिवीं विभजते-सेति। अत्रापि नित्यत्वानित्यत्वाभिन्नद्वित्वसंख्याविशिष्टविभाजकधर्मान्यतरवती पृथिवीत्यर्थः एवं जलादिविभागवाक्येपि बोध्यम्।द्विविधामपि पृथिवीं

१ लक्षणस्वरूपप्रामाण्यान्यतमप्रकारकज्ञानानुकूलव्यापारः निपूर्वकरूपधात्वर्थः शाब्दबोधस्तु पूर्ववत् ज्ञेयः एवमुत्तरत्रापि ।

दर्शयति—नित्येति। परमाणुरूपेति। जालसूर्यमरीचिमध्ये ऽतिसूक्ष्मतया दृश्यमानं द्रव्यं त्रसरेणुः सच त्रिभिर्द्व्यणुकैरारब्धः तच्च द्व्यणुकं परमाणुद्वयारब्धम् सच परमाणुर्नित्यः तस्याप्यवयवाङ्गीकारे तदवयवस्याप्यवयवाङ्गीकार इत्यनवस्थेतिभावः। कार्य्यरूपेति। द्व्यणुकादिमहावयविपर्य्यन्ते त्यर्थः। प्रकारान्तरेण पृथिवीं विभजते—पुनरिति। शरीरेन्द्रिय विषयभेदादिति। शरीरं चेन्द्रियं च विषयश्च शरीरेन्द्रियविषयाः तेषां भेदः तस्मात्। अत्र वृत्तित्वं षष्ठ्यर्थः असाधारणत्वं भेदशब्दार्थः अभिन्नत्वं पञ्चम्यर्थः तस्य विधाशब्दार्थेनान्वयः तथाच शरीरेन्द्रियविषयवृत्त्यसाधारणाभिन्नत्रित्वसंख्याविशिष्टविभाजकधर्मान्यतमवतीत्यर्थः। अस्मदादीनामित्यत्र पशुपक्षिसरीसृपादयो गृह्यन्ते। शरीरं द्विविधं योनिजमयोनिजमिति अयोनिजं धृष्टद्युम्नादीनां योनिजं चतुर्विधं जरायुजमण्डजं स्वेदजमुद्भिज्जं चेति जरायुजमस्मदादीनाम् अण्डजं पक्षिसर्पादीनाम् स्वेदजं कृमिदंशादीनाम् उद्भिज्जं तरुगुल्मादीनाम् रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारा एते च-

---

१ द्व्यणुकद्वयेन त्रसरेणूत्पत्तिस्वीकारे तु महत्त्वसंख्याजन्यमहत्परिमाणस्य त्रसरेणावभावेन त्रसरेणोः प्रत्यक्षं न स्यात् अतः द्व्यणुकत्रयेणैव त्रसरेणूत्पत्तिः कल्प्या त्रसरेणुपरिमाणस्य बहुत्वसंख्याजन्यत्वव्याप्यतायामविवादात्।

तुर्दश गुणाः पृथिव्याम्। ईन्द्रियं लक्षयति—गन्धग्राहकेति। गन्धविषयकग्रहजनकमित्यर्थः पार्थिवत्वे सति गन्धविषयकग्रहजनकत्वं लक्षणं तेन ज्ञानमात्रकरणे मनसि नातिव्याप्तिः । घ्राणमिति नाम नासाग्रवर्त्तीति तदधिकरणकथनं तेन नासाग्रमेवेन्द्रियं न भवतीत्यर्थः । "वायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्द्दश। दिक्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैव च"।

शीतस्पर्शवत्य आपः। ताश्च द्विविधाः। नित्या अनित्याश्च। नित्याः परमाणुरूपाः अनित्याः कार्यरूपाः। पुनस्त्रिविधाः। शरीरेन्द्रियविषयभेदात्। शरीरं वरुणलोके। इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति। विषयः सरित्समुद्रादिः।

जलं निरूपयति— शीतेति । अत्र शीतस्पर्शवत्त्वं लक्षणं जलं लक्ष्यमित्यादि पूर्ववदूह्यं नित्येत्यादि पृथिवीवत् ज्ञेयम् । शरीरेति । वरुणलोक इति । वरुणलोकवर्तिनां शरीरं जलीयमित्यर्थः यद्यपि तत्रापि पृथिव्युपष्टम्भो वर्तते पृथिव्युपष्टम्भं विनोपभोगसाधनत्वानुपपत्तेः तथापि जलभागस्याधिकत्वाज्जलीयत्वव्यवहारः

१ विशेषेन्द्रियमित्यर्थः । सामान्यलक्षणं तु—शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् ।

अत एवास्मदादिशरीरे जलभागसत्त्वेपि पार्थिवत्वव्यवहारः॥ इन्द्रियं लक्षयति—रसेति। जलीयत्वे सति रसग्रहजनकत्वमिन्द्रियलक्षणं रूपरसस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारा एते चतुर्दश गुणाः जले।

उष्णस्पर्शवत्तेजः। तच्च द्विविधम्। नित्यमनित्यंच। नित्यं परमाणुरूपम् अनित्यं कार्यरूपम्। पुनस्त्रिविधम्। शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षुः। कृष्णताराग्रवर्ति। विषयश्चतुर्विधः। भौमदिव्यौदर्याकरजभेदात्। भौमं वह्न्यादिकम्। अबिन्धनं दिव्यं विद्युदादि। भुक्तान्नपरिणामहेतुरौदर्यम्। आकरजं सुवर्णादि।

तेजो निरूपयति—उष्णेति। अत्रोष्णस्पर्शवत्त्वं लक्षणं तेजःलक्ष्यम् तैजसत्वे सति रूपग्रहजनकत्वमिन्द्रियलक्षणम् विषये पूर्वापेक्षया यो विशेषस्तमाह—विषयइति। भूमिसंबन्धीभौमः दिवःसंबन्धिदिव्यम् उदरसंबन्धि औदर्य्यम् आकरसंबन्धि आकरजमित्यर्थः। अबिन्धनमिति। आप एवेन्धनं दीप्तिसाधनं यस्य तथोक्तं दीप्त्यर्थकेन्धधातोः करणे ल्युट्। भुक्तेति। भुक्तस्यान्नादेः परिणामो विपाकः तस्य हेतुरित्य-

र्थः रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व-द्रवत्वसंस्कारा एते एकादश गुणाः तेजसि।

रूपरहितः स्पर्शवान्वायुः। स द्विविधः। नित्योऽनित्यश्च। नित्यः परमाणुरूपः अ-नित्यः कार्यरूपः। पुनस्त्रिविधः। शरीरे-न्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक्। सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतुः। शरीरान्तःसं-चारी वायुः प्राणः। स एकोप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते।

वायुं लक्षयति— रूपरहितेति। रूपरहितत्वे सति स्पर्शवत्त्वं लक्षणं वायुर्लक्ष्यः रूपरहितत्वमात्रो-क्तावाकाशेऽतिव्याप्तिः तत्रापि रूपाभावात् अतो वि-शेष्यं तावन्मात्रोक्तौ पृथिव्यादावतिव्याप्तिस्तत्रापि स्पर्श-सत्त्वादतो विशेषणम् वायवीयत्वे सति स्पर्शग्रहजनकत्व-मिन्द्रियस्य लक्षणम्। वृक्षादिकम्पनहेतुरिति। ननु प्रा-णवायोरत्रान्तर्भावानुक्तेः पृथिव्यादिष्वन्तर्भावासंभवादति-रिक्तद्रव्यत्वापत्तिरित्यत आह—शरीरान्तःसंचारीति। तथाच विषयवायावन्तर्भावान्न दोष इति भावः। तथाप्य-पानादीनां क्वान्तर्भाव इत्यत आह—सचैकोपीति। एक एवेत्यर्थः। उपाधिभेदादिति। हृदयदेशवृत्तिः प्राणः

गुददेशवृत्तिरपानः सर्वशरीरवृत्तिर्व्यानः कण्ठदेशवृत्तिरुदानः नाभिदेशवृत्तिः समानः "हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः। उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः" इति कोशादिति भावः। स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारा एते नव गुणा वायौ ज्ञेयाः।

शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यंच।

आकाशंलक्षयति—शब्दगुणकमिति। शब्दो गुणो यस्य तच्छब्दगुणकम् अत्र यद्यपि समवायेन शब्दवत्त्वमाकाशस्य लक्षणमित्येव सम्यक् अवच्छेदकतासंबन्धेन शब्दवति भेर्यादावतिव्याप्तेरभावात् तथापि आकाशे शब्द एव विशेषगुण इति द्योतनार्थो गुणशब्दः। रूपरसगन्धस्पर्शसांसिद्धिकद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छा द्वेषप्रयत्नधर्माधर्मभावनाख्यसंस्कारा एते विशेषगुणाः अन्ये सामान्यगुणाः। तत्र संख्या परिमाणपृथक्त्वसंयोगविभागशब्दा एते षट् आकाशे ज्ञेयाः। आकाशस्य भेदाभावादाह—तच्चैकमिति। विभ्विति। विभुत्वं सर्वमूर्त्तद्रव्यसंयोगित्वं पृथिव्यप्तेजोवायुमनांसि मूर्तानि पृथिव्यप्तेजोवाय्वाकाशानि भूतानि नित्यम् उत्पत्तिविनाशरहितम्।

अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च।

कालं निरूपयति-अतीतादीति। आदिशब्देन वर्तमानभवि

ष्यतोःसंग्रहः तद्व्यवहारासाधारणकारणत्वं कालस्य लक्षणम् असाधारणेत्यनुक्तौ कार्य्यमात्रकारणभूतेऽदृष्टादावतिव्याप्तिःस्यादत उक्तमसाधारणेति अर्साधारणत्वमन्यत्र द्रष्टव्यम् अत्रातीतत्वं नाम वर्तमानकालवृत्तिध्वंसप्रतियोगित्वं वर्तमानत्वं नाम एतत्कालवृत्तित्वं भविष्यत्त्वं नाम वर्तमानकालवृत्तिप्रागभावप्रतियोगित्वं तद्व्यवहारे कालः कथं कारणमिति चेदित्थं व्यवहारे व्यवहर्तव्यतावच्छेदकस्यं कारणत्वात् अतीतो घट इति व्यवहारे वर्तमानकालवृत्तिध्वंसप्रतियोगिघटो व्यवहर्तव्यः कालो व्यवहर्तव्यतावच्छेदकः यद्विशिष्टो व्यवहर्तव्यः स व्यवहर्तव्यतावच्छेदक इति नियमात् अतो लक्षणं सुस्थितम्। सचैक इति। भेदाभावादिति भावः क्षणादिभेदस्तूपाधिभेदात् क्षणनियामकोपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म पूर्वसंयोगावच्छिन्नवि-

---

१ असाधारणकारणत्वं नाम कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणत्वम् इह बोध्यम्।

२ "अतीतोघट" इति व्यवहारे वर्तमानकालवृत्तिध्वंसप्रतियोगित्वविशिष्टघटत्वं व्यवहर्तव्यतावच्छेदकं तत्कुक्षिप्रविष्टत्वात्कालोपि व्यवहर्तव्यतावच्छेदकः।

३ स्वं—क्रिया घटगतैकक्रियानाशोत्तरोत्पन्नतद्गतक्रियान्तरजन्यविभागप्रागभावविशिष्टस्य प्रथमकर्मणः क्षणचतुष्टयावस्थायिनः क्षणत्वापत्तिरतः स्वजन्येति।

भागो वा पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा उत्तरसंयोगावच्छिन्नं कर्म वा एतद्विशिष्टकालः क्षणमित्युच्यते क्रिया क्रियातो विभागः विभागात्पूर्वसंयोगनाशः उत्तरसंयोगोत्पत्तिः ततः क्रियानाशः एवं क्षणादिना दिनव्यवहारः संख्यादिपञ्च गुणाः काले।

प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वीच।

दिशं निरूपयति—प्राच्यादीति। आदिना प्रतीच्य उदीच्य अवाच्य एषां परिग्रहः तद्व्यवहारहेतुत्वं

---

१ ननु प्रथमक्षणे क्षणव्यवहारोपपादनेपि द्वितीयक्षणे कथं तदुपपादनम् तत्र क्रियाजन्यविभागोत्पत्त्या विभागप्रागभावासंभवात्. अतस्तत्रापि क्षणव्यवहारोपपादकमुपाधिमाह—पूर्वसंयोगेति स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्वजन्यविभाग इत्यर्थः. तेन स्वजन्यविभागस्य यत्किंचित्पूर्वसंयोगविशिष्टस्यद्वित्रिक्षणवृत्तित्वेपि यत्किंचिद्विभागस्य स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्य तथात्वेपि न क्षतिः।

२ तृतीयक्षणे तदुपपादकमुपाधिमाह—पूर्वसंयोगनाशेति स्वजन्यविभागजन्यपूर्वसंयोगनाशावछिन्नस्वजन्योत्तरसंयोगप्रागभाव इत्यर्थः।

३ चतुर्थक्षणे तदुपपादकमुपाधिमाह—उत्तरसंयोगेति स्वनाशकोत्तरसंयोग इत्यर्थः तेन सर्वस्यैव संयोगस्य उत्तरसंयोगतया तद्विशिष्टकर्मणः क्षणचतुष्टयावस्थायिनः न क्षणत्वापत्तिः।

दिशो लक्षणं प्राच्यत्वं नाम प्राचीदिग्वृत्तित्वम् एवमुदीच्यत्वादिकमपि। तत्र हेतुत्वं कथमिति चेदुच्यते व्यवहारे व्यवहर्तव्यतावच्छेदकस्य कारणत्वात् प्राच्यइति व्यवहारे प्राचीदिग्वृत्तित्वं व्यवहर्त्तव्यतावच्छेदकं तद्घटकत्वात् प्राचीदिगपि व्यवहर्तव्यतावच्छेदिका तस्मादुक्तमेव लक्षणम् अत्राप्यसाधारणहेतुत्वं विशेषणं देयम् अन्यथा कालादावतिव्याप्तिः तेषां कार्यमात्रं प्रति साधारणकारणत्वात्। एकेति। अवान्तरभेदाभावादितिभावः प्राचीत्यादिव्यवहारस्तूपाधिभेदात् तथाहि स्वनिष्ठोदयगिरिसंयोगपरम्परापर्याप्तसंख्यान्यूनसंख्यापर्याप्त्यधिकरणोदयगिरिसंयोगपरम्परावत्पिण्डावच्छिन्ना दिक् स्वस्मात्प्राचीत्युच्यते एवं स्वनिष्ठोदयगिरिसंयोगपरम्परापर्याप्तसंख्याधिकसंख्यापर्याप्त्यधिकरणोदयगिरिसंयोगपरम्परावत्पिण्डावच्छिन्ना दिक् स्वस्मात्प्रतीची एवमन्ये अप्यूह्ये।

ज्ञानाधिकरणमात्मा। स द्विविधः। जीवात्मा परमात्मा चेति। तत्रेश्वरः सर्वज्ञः परमात्मा एक एव। सुखदुःखादिरहितः जीवात्मा प्रतिशरीरं भिन्नोविभुर्नित्यश्च।

आत्मानं निरूपयति— ज्ञानाधिकरणमिति ज्ञानाश्रयत्वम् आत्मनो लक्षणं यद्यपि मुक्तात्मनि ज्ञाना-

भावादव्याप्तिप्रसङ्गः तथापि ज्ञानाभावेपि ज्ञानाश्रयता-ऽस्त्येवेति न दोषः अथवा ज्ञानसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं ज्ञानसमानाधिकरणपृथिव्यवृत्तिजातिमत्त्वं वा ज्ञानसमानाधिकरणद्रव्यविभाजकोपाधिमत्त्वं वा तदर्थः। आत्मानं विभजते—स द्विविध इति। परमात्मानमाह—तत्रेति। तयोर्मध्ये इत्यर्थः नित्यज्ञानवत्त्वं परमात्मनो लक्षणम् इदमेव परमशब्देन ज्ञायते। सर्वज्ञ इति स्वरूपनिरूपणं नतु लक्षणं योगिष्वतिव्याप्तेः अथवा कार्य्यत्वावच्छिन्नकार्यतानिरूपितकारणत्वे सति ज्ञानवत्त्वमीश्वरशब्दाभिप्रेतं वा लक्षणम् ईश्वरद्वयानङ्गीकारादेक एवेत्युक्तं संख्यादिगुणाः पञ्च ज्ञानं कृतिः इच्छा एतेऽष्ट ईश्वरे ज्ञेयाः नित्यसुखमपीति केचित्। जीवं निरूपयति—प्रतिशरीरमिति। दुःखसमानाधिकरणनित्यज्ञानासमानाधिकरणजातिमत्त्वं लक्षणं द्वेषाद्याश्रयत्वं वा शरीरानन्त्यात् जीवोप्यनन्त इत्यर्थः। संख्यादयः पञ्च बुद्ध्यादयोऽष्टौ संस्कार एते चतुर्दश गुणाः जीवे ज्ञेयाः।

सुखाद्युपलब्धिसाधनमिन्द्रियं मनः । तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च ।

---

१ अव्याप्यवृत्तेरधिकरणता नाऽव्याप्यवृत्तिरितिमतमवलम्ब्य इदम् ।

२ आत्मघटान्यतरत्वमादाय घटेऽतिव्याप्तिः अतो धर्मेत्यनुक्त्वा जातिरित्युपात्तम् ।

मनो निरूपयति—सुखादीति। सुखादीनामुपलब्धिः ज्ञानं तत्र साधनत्वे सतीन्द्रियत्वं मनसो लक्षणं सुखादीनामित्यत्रादिपदेन दुःखादिपरिग्रहः विषयत्वं षष्ठ्यर्थः तस्य स्वनिरूपित विषयितासंबन्धेन ज्ञानेऽन्वयः विषयत्वे सुखादीनां निष्ठतासं-बन्धेनान्वयः सप्तम्या निरूपितत्वमर्थः तस्य साधनतायामन्वयः तथाच सुखादिनिष्ठविषयतानिरूपितविषयितावज्ज्ञान निरूपितसाधनत्वेसतीन्द्रियत्वं मनसो लक्षणमिति फलितम् इन्द्रियत्वमात्रोक्तौ चक्षुरादावतिव्याप्तिरतः सुखादीति तावन्मात्रोक्तावात्मन्यतिव्याप्तिरतो विशेष्यम् आत्मनो ज्ञानमात्रं प्रति समवायिकारणत्वात् । प्रत्यात्मनियतत्वादिति । आत्मनामानन्त्येन मनोप्यनन्तमित्यर्थः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारा एतेऽष्टौ गुणाः मनसि ज्ञेयाः ।

अथ गुणाः । चक्षुर्मात्रग्राह्यो गुणो रूपम् । तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधम् । पृथिवीजलतेजोवृत्ति। तत्र-पृथिव्यां सप्तविधम्। अभास्वरं शुक्लं जले । भास्वरं शुक्लं तेजसि ।

---

१ आधेयतासंबन्धेन इत्येव पाठःसाधुरित्यस्मद्गुरुचरणाः ।

२ मनोलक्षणस्य इन्द्रियत्वघटितत्वेन इन्द्रियलक्षणस्य च मनोघटितत्वेन अन्योन्याश्रयदोषः अतः इन्द्रियत्वं परित्यज्य क्रियावत्त्वं निवेशनीयम् ।

अथ गुणान् निरूपयति—अथ गुणा इति। तत्र प्रथमोद्दिष्टं रूपं निरूपयति—निरूपणं नाम लक्षणस्वरूपप्रामाण्यप्रकारकज्ञानजनकशब्दप्रयोगः चक्षुर्मात्रेति । चक्षुर्मात्रग्राह्यत्वे सति गुणत्वं रूपलक्षणं गुणत्वमात्रोक्तौ रसादावतिव्याप्तिरतोविशेषणं तावन्मात्रोक्तौरूपत्वजातौ रूपाभावे चातिव्याप्तिः यो गुणो यदिन्द्रियग्राह्यस्तन्निष्ठा जातिस्तदभावश्च तदिन्द्रियग्राह्याविति नियमात् अतो विशेष्यं चक्षुरेव चक्षुर्मात्रं चक्षुर्मात्रेण ग्राह्यः चक्षुर्मात्रग्राह्यः तृतीयायाश्च जन्यत्वमर्थः ग्राह्यत्वं ग्रहविषयत्वं जन्यत्वस्य ग्रहेऽन्वयःमात्रशब्दस्येतरव्यवच्छेदकत्वमर्थः तथाच चक्षुरितरेन्द्रियजन्यज्ञानाऽविषयत्वे सति चक्षुरिन्द्रियजन्यज्ञानविषयत्वे सति गुणत्वं लक्षणं मात्रेत्यनुपादाने संयोगादावतिव्याप्तिः चक्षुर्जन्येत्यनुक्तौ अतीन्द्रियगुरुत्वादावतिव्याप्तिरत उभयोरुपादानम्। नचैवं ज्ञानमात्रस्य मनोजन्यत्वादसंभव इति वाच्यं चक्षुरितरेन्द्रियेत्यत्र बाह्येन्द्रियस्य विवक्षितत्वात् अथवा त्वगिन्द्रियजन्यज्ञानाविषयत्वं मात्रशब्दार्थः अतो नासंभवः। नच तथापि प्रभाघटसंयोगेऽतिव्याप्तिरितिवाच्यम् गुणशब्दस्य विशेषगुणपरत्वात् । ननु विशेषगुणविवक्षयैव संयोगादावतिव्याप्त्यभावेन मात्रशब्दो व्यर्थ इति चेन्न सांसिद्धिकद्रवत्वेऽतिव्याप्तिवारणाय मात्रशब्दस्यावश्यकत्वात्। अथ चक्षुरग्राह्यपरमाणुरूपादावव्याप्तिरिति चेन्न चक्षुर्मात्र-

ग्राह्यजातिमत्त्वे सति गुणत्वस्य विवक्षितत्वात् तदा संयोगत्वादेश्चक्षुर्मात्रग्राह्यत्वाभावेन संयोगादिसामान्यगुणेऽतिव्याप्त्यभावेन न विशेषगुण[१]विवक्षा । ननु रूपत्वजातौ रूपाभावे च तादृशजातिविरहेणातिव्याप्त्यभावाद्गुणपदं निरर्थकमिति चेन्न सुवर्णत्वजातिमादाय सुवर्णेऽतिव्याप्तिवारणाय तस्यावश्यकत्वात् । रूपं विभजते—विभागो नाम अवान्तरधर्मप्रकारकज्ञानजनकशब्दप्रयोगः तच्चेति । आश्रयमाह—पृथिवीति ।

रसनाग्राह्यो गुणो रसः । स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः । पृथिवीजलवृत्तिः । पृथिव्यां षड्विधः । जले मधुर एव ।

रसं निरूपयति—रसनेति । रसनेन्द्रियजन्यज्ञानविषयत्वे सति गुणत्वं रसलक्षणं रूपादौ रसत्वे चातिव्याप्तिवारणाय विशेषणविशेष्ययोरुभयोरुपादानम् अत्रापि परमाणुरसेतिव्याप्तिवारणाय रसनाग्राह्यजातिमत्त्वं लक्षणं बोध्यम् । रसं

१ विशेषगुणत्वं च—भावनान्यो यो वायुवृत्तिस्पर्शावृत्तिधर्मसमवायी तदन्यत्वे सति गुरुत्वाऽजलद्रवत्वान्यगुणत्वम्. जात्यादावतिव्याप्तिवारणाय विशेष्यम्. संयोगादिवारणाय सत्यन्तम्. सत्त्वादिकमादायाऽसंभववारणाय स्पर्शसंग्रहाय च स्पर्शावृत्तीति. ।

विभजते—सचेति। आश्रयमाह—पृथिवीति। जलेमधुर-एवेति। आम्लादिप्रतीतिरौपाधिकीति भावः।

घ्राणग्राह्यो गुणो गन्धः। स द्विविधः। सुरभिरसुरभिश्च। पृथ्वीमात्रवृत्तिः।

गन्धं निरूपयति—घ्राणेति। विभजते—स इति।

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। सच त्रिविधः। शीतोष्णानुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः।

स्पर्शं निरूपयति—त्वगिन्द्रियेति। अत्रापि चक्षुरग्राह्यत्वगिन्द्रियग्राह्यजातिमत्त्वे सति गुणत्वं लक्षणं प्रयोजनं तु रूपलक्षणवद्बोध्यं गुणत्वानुपादाने वायोः प्रत्यक्षत्वाङ्गीकर्तृमते वायुत्वजातिमादाय वायावतिव्याप्तिरतस्तदुपादानम्।

रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यंच। अन्यत्रापाकजं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्।

रूपादीनां चतुर्णामेकोक्त्या पाकप्रकारमाह-रूपादीति। अन्यत्रेति। जलादावित्यर्थः यद्यपि जलादौ रूपादिचतुष्टयं

नास्ति तथापि यथासंभवं ज्ञेयम् । अत्रेदं बोध्यं पाको नाम विजातीयतेजःसंयोगः यथा तृणादिपिहिते आम्रफले ऊष्मसंयोगेन पूर्वहरितरूपनाशपूर्वकं पीतरूपं जायते एवं मधुररसः सौरभविशेषः स्पर्शविशेषश्च जायते तत्रापि रूपजनकतेजःसंयोगापेक्षया रसजनकतेजःसंयोगो भिन्नः एवं गन्धस्पर्शयोरपि आम्रादौ पूर्वरूपसत्त्वेपि रसान्तराद्युत्पत्तिदर्शनात् एवं पूर्वरससत्त्वेपि रूपान्तरोत्पत्तिदर्शनात् अत्र पीलुपाकवादिनः परमाणुष्वेव पाकमङ्गीकुर्वन्ति तन्मते एवं क्रमः आपानिक्षिप्तघटे वेगवदन्यवयवकपालसंयोगेन कपाले आरम्भकसंयोगविरोधिविभागजनकक्रिया जायते ततो विभाग स्तत आरम्भकसंयोगनाशः ततो घटनाश एवं रीत्या द्व्यणुकपर्य्यन्तनाशे परमाणौ पाकेन पूर्वरूपनाशरूपान्तरोत्पत्ती तत ईश्वरचिकीर्षया परमाणौ क्रिया ततः परमाणुद्वयसंयोगः ततो द्व्यणुकोत्पत्तिः एवं महावयविपर्य्यन्तमुत्पद्यत इति । पिठरपाकवादिनस्तु घटे परमाणुपर्य्यन्तावयवेषु चैकदैव पाकवशात् पूर्वरूपनाशो रूपान्तरोत्पत्तिश्च जायेते घटादिनाशाङ्गीकारे गौरवात् अन्यथा सोयं घट इति प्रत्यभिज्ञा न स्यादित्याहुः । एवं गोभुक्ततृणादीनां द्व्यणुकपर्य्यन्तनाशे तृणारम्भकपरमाणुषु दुग्धे यादृशरूपादिकं तादृशरूपादिकं जायते ततस्तैः परमाणुभिर्द्व्यणुकान्यारभ्यन्ते एवं दुग्धारम्भः । ननु तृणपरमाणुभिः कथं दुग्धद्व्यणुकारम्भइति चेन्न परमा-

णौ द्रव्यत्वव्याप्यव्याप्यजातिसद्भावे प्रमाणाभावात् एवं दध्याद्यारम्भोपि ज्ञेयः।

एकत्वादिव्यवहारासाधारणहेतुः संख्या। सा नवद्रव्यवृत्तिः। एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्रानित्यमेव।

संख्यां निरूपयति—एकत्वादीति। एकत्वादीनां यो व्यवहारस्तदसाधारणहेतुत्वं संख्यालक्षणं षष्ठ्याः प्रकारत्वमर्थः तस्य व्यवहारशब्दार्थैकदेशज्ञानेऽन्वयः व्यवहारो नाम ज्ञानजनकशब्दप्रयोगः तथाच एकत्वादिप्रकारकज्ञानजनकशब्दप्रयोगहेतुत्वं फलितम् अयमेकः इमौ द्वौ इत्यादिव्यवहारे एकत्वादिकं हि व्यवहर्त्तव्यतावच्छेदकम् अतस्तत्कारणत्वं सिद्धम् असाधारणेत्यनुक्तौ कार्य्यत्वावच्छिन्नकार्य्यतानिरूपितकारणे कालादावतिव्याप्तिरतस्तदुपादानम् असाधारणकारणत्वं नाम कार्य्यत्वातिरिक्तधर्मावच्छिन्नकार्य्यतानिरूपितकारणत्वम् एकत्वादिकं हि तादृशव्यवहारत्वावच्छिन्नं प्रति कारणं नतु कार्य्यत्वावच्छिन्नं प्रति कारणं कालादिस्तु कार्य्यत्वावच्छिन्नं प्रति कारणं नतु तादृशव्यवहारत्वावच्छिन्नं प्रति कारणम् अतो ना-

---

१ तृणत्वजातिसद्भावे इत्यर्थः।

तिव्याप्तिः। नित्यगतमिति। परमाण्वादिगतमित्यर्थः अनित्यगतं द्व्यणुकादिगतं द्वित्वादिकं तु सर्वत्रानित्यमेवेति द्वित्वादेर्नित्यद्रव्येष्वनित्यद्रव्येषु चापेक्षाबुद्धिजन्यत्वात् तन्नाशनाश्यत्वाच्चानित्यमेवेत्यर्थः। अयं क्रमः अयमेक अयमेक इति अपेक्षाबुद्ध्या द्वित्वमुत्पद्यते ततो द्वित्वनिर्विकल्पकं ततो द्वित्वसविकल्पकं द्वित्वसविकल्पकक्षणेऽपेक्षाबुद्धिनाशः ततो द्वित्वनाशः।

मानव्यवहारासाधारणकारणं परिमाणम्। नवद्रव्यवृत्ति। तच्चतुर्विधम्। अणु महत् दीर्घं ह्रस्वं चेति।

परिमाणं निरूपयति—मानेति। पूर्ववदर्थो बोध्यः। त विभजते—तच्चतुर्विधमित्यादिना। अण्वादिशब्दस्य परिमाणवद्द्रव्यपरत्वादनुपपत्तिः स्यादतस्तेषां भावप्रधाननिर्देशः[1] अणुत्वं महत्वं दीर्घत्वं ह्रस्वत्वं चेत्यर्थः।

पृथग्व्यवहारासाधारणकारणं पृथक्त्वम्। सर्वद्रव्यवृत्ति।

पृथक्त्वं निरूपयति—पृथगिति। अयमस्मात्पृथगितिव्यवहारे पृथक्त्वस्य व्यवहर्त्तव्यतावच्छेदकत्वात् तदसाधारणकारणत्वमस्तीति लक्षणसमन्वयः।

---

१ गुणिबोधकशब्दैर्गुणविभजनस्यअदृष्टत्वादिति भावः।

संयुक्तव्यवहारासाधारणो हेतुः संयोगः। सर्वद्रव्यवृत्तिः।

संयोगं निरूपयति—संयुक्तेति। घटपटौ संयुक्तौ इति व्यवहारे संयोगस्यासाधारणकारणत्वाल्लक्षणसंगतिः संयोगो द्विविधः कर्मजन्यः संयोगजन्यश्चेति कर्मजन्यो हस्तपुस्तकसंयोगः द्वितीयः कायपुस्तकसंयोगः विभुद्वयसंयोगो नास्तीति केचित् केचित्तु विभुद्वयस्य नित्यसंयोगोस्तीति वदन्ति।

संयोगनाशको गुणो विभागः। सर्वद्रव्यवृत्तिः।

विभागं निरूपयति—संयोगनाशक इति। संयोगनाशहेतुत्वे[1] सति गुणत्वं विभागस्य लक्षणं गुणत्वमात्रोक्तौ रूपादावतिव्याप्तिः विशेषणमात्रोक्तौ कर्मण्यतिव्याप्तिः।

परापरव्यवहारासाधारणकारणे परत्वापरत्वे। पृथिव्यादिचतुष्टयमनोवर्तिनी। ते द्विविधे। दिक्कृते कालकृते चेति। दूरस्थे दिक्कृतं परत्वम्। समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम्। कनिष्ठे कालकृतमपरत्वम्।

---

१ संयोगनाशहेतुत्वं च—प्रतियोगित्वसंबन्धानवच्छिन्ननाशविशिष्टजन्यतानिरूपितजनकत्वम्।

परत्वापरत्वे एकोक्त्या निरूपयति—परापरेति । परव्यवहारासाधारणकारणत्वं परत्वस्य लक्षणम् अपरव्यवहारासाधारणकारणत्वम् अपरत्वस्य लक्षणम् । ते विभजते—ते इति। तथाच दैशिकं परत्वं दैशिकमपरत्वं कालिकं परत्वं कालिकमपरत्वमिति विभागः । दैशिकपरत्वापरत्वे उदाहरति—दूरस्थ इत्यादिना । पाटलिपुरात्काशीमपेक्ष्य प्रयागः परः इत्यनुभवात् प्रयागे पाटलिपुरावधिककाशीनिरूपितपरत्वमङ्गीकार्य्यं तच्च परत्वं पाटलिपुरात् काशीमपेक्ष्य प्रयागो दूरस्थ इत्यपेक्षाबुद्ध्यात्मकप्रयागनिष्ठदूरस्थत्वज्ञानात् पाटलिपुरावधिककाशीनिरूपितपरत्वं प्रयागे जायते एवं पाटलिपुरात्प्रयागमपेक्ष्य काशी समीपस्थेति अपेक्षाबुद्ध्यात्मककाशीनिष्ठसमीपस्थत्वज्ञानात्पाटलिपुरावधिकप्रयागनिरूपिताऽपरत्वं काश्यां जायते । कालिके उदाहरति—ज्येष्ठ इत्यादिना । चैत्रो मैत्रात्पर इत्यनुभवात् मैत्रावधिकपरत्वं चैत्रे अङ्गीकार्य्यं तच्च चैत्रवृत्तिज्येष्ठत्वज्ञानात् चैत्रो मैत्राज्ज्येष्ठ इत्यपेक्षाबुद्धिरूपाज्जायते एवं मैत्रश्चैत्रादपर इत्यनुभवात् मैत्रे चैत्रावधिकाऽपरत्वमङ्गीकार्य्यं तच्च मैत्रवृत्तिकनिष्ठत्वज्ञानात् मैत्रश्चैत्रात्कनिष्ठ इत्यपेक्षाबुद्धिरूपाज्जायते ।

आद्यपतनासमवायिकारणं गुरुत्वम् । पृथिवीजलमात्रवृत्ति ।

गुरुत्वं निरूपयति—आद्येति । पतनं नाम अधोदेशसंयोगानुकूलं कर्म आद्यपतननिरूपितासमवायिकारणत्वं गुरुत्वस्य लक्षणम् अत्रासमवायिकारणत्वं कार्य्येण सहैकार्थसमवेतत्वे सति कारणत्वं पतनं समवायसंबन्धेन फलादौ जायते क्रियाक्रियावतोः समवायात् तत्र गुरुत्वमपि समवेतं सत्कारणं भवतीति लक्षणसंगतिः द्वितीयादिपतनं प्रति वेगस्यासमवायिकारणत्वात् वेगेतिव्याप्तिवारणाय आद्येति आद्यपतनं प्रत्यपि समवायिकारणे फलादावतिव्याप्तिवारणाय समवायीत्युक्तम् । पृथिवीजलमात्रवृत्तीति । सुवर्णादौ गुरुत्वप्रतीतिस्तु सुवर्णसंयुक्तपीतिमाश्रयपृथिवीभागगतगुरुत्वविषयिणीति नानुपपत्तिः ।

आद्यस्यन्दनासमवायिकारणं द्रवत्वम् । पृथिव्यप्तेजोवृत्ति । तद्द्विविधम् । सांसिद्धिकं नैमित्तिकं च । सांसिद्धिकं जले । नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादावग्निसंयोगजन्यं द्रवत्वम् । तेजसि सुवर्णादौ ।

द्रवत्वं निरूपयति—आद्यस्यन्दनेति । स्यन्दनं जलादिवृत्तिगमनक्रियाविशेषः अन्यत्पूर्ववत् ज्ञेयम् । तद्विभजते—तच्च द्विविधमिति । तमुदाहरति—सांसिद्धिकमिति ।

---

१ पतने आद्यत्वं च—स्वसमानाधिकरणपतनप्रतियोगिकध्वंसाऽसमानकालिकत्वम । अत्र स्वशब्देन पतनं ग्राह्यम् ।

नैमित्तिकशब्दार्थं वदन् पृथिवीतेजोविशेषस्य तदाश्रयत्वमाह—पृथिव्यामित्यादिना । अग्निसंयोगजन्यमिति । अग्निसंयोगरूपनिमित्तजन्यमित्यर्थः ।

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः । जलमात्रवृत्तिः ।

स्नेहं लक्षयति—चूर्णादीति । चूर्णादिपिण्डीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्षणं पिण्डीभावो नाम ग्रहणकर्षणयोग्यसंयोगविशेषः चूर्णादावतिव्याप्तिवारणाय गुणत्वमुक्तम् ।

श्रोत्रग्राह्यो गुणः शब्दः।आकाशमात्रवृत्तिः। सच द्विविधः।ध्वन्यात्मको वर्णात्मकश्चेति। ध्वन्यात्मको भेर्यादौ । वर्णात्मकः संस्कृतभाषादिरूपः ।

शब्दं लक्षयति—श्रोत्रग्राह्येति । शब्दत्वेऽतिव्याप्तिवारणाय गुणत्वम् । तं विभजते—सचेति । ध्वन्यात्मको

१ शब्दस्त्रिविधः । संयोगजो विभागजः शब्दजश्चेति । आद्ये असमवायिकारणं भेर्याकाशसंयोगः निमित्तकारणंतु भेरीदण्डसंयोगः । द्वितीये वंशाकाशविभागः असमवायिकारणं दलद्वयविभागो निमित्तकारणम् । तृतीयेतु पूर्वपूर्वशब्दः असमवायिकारणं वायुः निमित्तकारणम् ।

भेर्य्यादाविति । भेर्य्याद्यवच्छेदेन जायमानः शब्दो ध्वन्यात्मक इत्यर्थः ।

सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः । सा द्विविधा । स्मृतिरनुभवश्च । संस्कारजन्यं ज्ञानं स्मृतिः । तद्भिन्नं ज्ञानमनुभवः ।

बुद्धिं निरूपयति—सर्वव्यवहारेति । व्यवहारत्वावच्छिन्नकार्य्यतानिरूपितकारणत्वं बुद्धेर्लक्षणम् अर्थं बुध्वा शब्दरचनेति नियमेन शब्दरचनारूपव्यवहारं प्रति बुद्धेः कारणत्वाल्लक्षणसंगतिः । लाघवमभिप्रेत्य लक्षणान्तरमाह—ज्ञानमिति । ज्ञानत्वजातिमत्वं लक्षणमित्यर्थः । बुद्धिं विभजते—सा द्विविधेति । स्मृतिं लक्षयति—संस्कारेति । ज्ञानत्वमात्रोक्तावनुभवेऽतिव्याप्तिः विशेषणमात्रोक्तौ संस्कारध्वंसे[1]ऽतिव्याप्तिः ध्वंसं प्रति प्रतियोगिनः कारणत्वात् अत उभयोरुपादानम् । अनुभवं लक्षयति—तद्भिन्नमिति । स्मृतिभिन्नत्वे सति ज्ञानत्वम् अनुभवस्य लक्षणमित्यर्थः स्मृ-

---

१ संस्कारत्वावच्छिन्नजनकतानिरूपितजन्यताशालित्वनिवेशेन अतिव्याप्तिवारणसंभवेपि न ज्ञानपदस्य वैयर्थ्यम् उक्तनिवेशबोधकत्वात् । "सोयं देवदत्तः" इति प्रत्यभिज्ञायामतिव्याप्तिस्तु चक्षुराद्यजन्यत्वविशेषणनिवेशेन परिहर्तव्या पुस्तकान्तरे मात्रपदनिवेशोपि उक्ताभिप्रायक एव । अन्यथा-संस्कारेतराऽऽत्मादिजन्यत्वस्य स्मृतौ सत्त्वेन संस्कारेतराऽजन्यत्वघटितलक्षणस्य असंभवापत्तेः ।

तावतिव्याप्तिवारणाय तद्भिन्नत्वेसतीति घटादावतिव्याप्ति-वारणाय ज्ञानमिति ।

स द्विविधः । यथार्थोऽयथार्थश्च । तद्वति तत्प्रकारकानुभवो यथार्थः । यथा रजते इदं रजतम् इति ज्ञानं सैव प्रमेत्युच्यते ।

अनुभवं विभजते—स द्विविधेति । यथार्थानुभवं लक्षयति—तद्वतीति । सप्तम्या विशेष्यतानिरूपितविशेष्यित्वमर्थः तस्यानुभवेऽन्वयः तत्प्रकारकत्वं तन्निष्ठप्रकारतानिरूपितप्रकारित्वं तथाच तद्वन्निष्ठविशेष्यतानिरूपितविशेष्यित्वे सति तन्निष्ठप्रकारतानिरूपितप्रकारित्वे सति अनुभवत्वं लक्षणम् उभयत्र तच्छब्देन प्रकारधर्मो ग्राह्यः रजते इदं रजतम् इत्यनुभवे रजतत्वं प्रकारः तस्य रजते विद्यमानत्वात् तद्वत्पुरोवृत्ति रजतं तस्मिन् विशेष्यताऽस्ति तन्निरूपितविशेष्यित्वमनुभवेऽस्ति रजतत्वस्य प्रकारत्वात् तन्निरूपितप्रकारित्वमप्यनुभवेऽस्तीति लक्षणसमन्वयः अनुभवत्वमात्रोक्तावयथार्थानुभवेऽतिव्याप्तिः अतो विशेषणद्वयं

---

१ तद्वत्त्वं च प्रकारतावच्छेदकसंबन्धेन बोध्यम् तेन कालिकसंबन्धेन रङ्गादौ रजतत्वसत्त्वेपि रङ्गे " इदं रजतम् " इति भ्रमे नातिव्याप्तिः । " घटे घटत्वम् " इत्यादिप्रमायामव्याप्तिवारणप्रकारस्तु दीपिकादौ द्रष्टव्यः ।

तन्निष्ठप्रकारतानिरूपितप्रकारित्वे सत्यनुभवत्वमित्युक्तौ रङ्गे इदं रजतमिति भ्रमे रजतयथार्थानुभवलक्षणस्यातिऽव्याप्तिः रजतत्वभ्रमेति रजतत्वनिष्ठप्रकारतानिरूपितप्रकारित्वे सत्यनुभवत्वस्य सत्त्वात् अतस्तद्वतीत्युक्तं रजतत्वाऽभाववतो रङ्गस्य विशेष्यत्वान्नातिव्याप्तिःतद्वन्निष्ठविशेष्यतानिरूपितविशेष्यित्वे सत्यनुभवत्वम् इत्येतन्मात्रोक्तौ रजते इदं रङ्गम् इति रङ्गत्वभ्रमे रजतत्वानुभवलक्षणस्यातिव्याप्तिः तत्र रजतत्ववतो रजतस्य विशेष्यत्वात् अतस्तत्प्रकारकेत्युक्तं रजते इदं रङ्गम् इति भ्रमे रङ्गत्वस्य प्रकारत्वेन रजतत्वनिष्ठप्रकारतानिरूपितप्रकारित्वाभावान्नातिव्याप्तिः इच्छादावतिव्याप्तिवारणायानुभवत्वम्। ननु रङ्गरजतयोः इमे रजतरङ्गे इति भ्रमेऽतिव्याप्तिः तत्र रङ्गत्ववतो रजतत्ववतश्च विशेष्यत्वात् रङ्गत्वरजतत्वयोः प्रकारत्वाच्च तद्वन्निष्ठेत्यादिलक्षणस्य सत्त्वादिति चेन्न तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारता निरूपितप्रकारित्वे सत्यनुभवत्वस्य विवक्षितत्वात् नहि तादृशभ्रमे रजतत्वनिष्ठप्रकारता रजतनिष्ठविशेष्यतानिरूपिता किंतु रङ्गनिष्ठविशेष्यता निरूपिता यस्य यदंशे प्रकारत्वं तन्निष्ठप्रकारतायाः तन्निष्ठविशेष्यतानिरूपितत्वनियमात् नहि रजतत्वं रजतांशे प्रकारः किंतु रङ्गांशे प्रकारः अतो नातिव्याप्तिः। ननु ग्रन्थान्तरे प्रमाऽप्रमाभेदेन विभागः कृतः कथमत्र न तथा कृत इति तत्राह—सैवेति।

तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। यथा शुक्तौ इदं रजतम् इति ज्ञानम्। सैवाऽप्रमेत्युच्यते।

अयथार्थानुभवं लक्षयति—तदभाववतीति। अत्र सप्तम्यर्थो विशेष्यतानिरूपितविशेष्यित्वं तथाच तदभाववन्निष्ठविशेष्यतानिरूपितविशेष्यित्वे सति तन्निष्ठप्रकारतानिरूपितप्रकारित्वे सत्यनुभवत्वं लक्षणं रङ्गे इदं रजतम् इत्यनुभवे प्रकारीभूतरजतत्वाऽभाववतो विशेष्यत्वाद्रजतत्वस्य प्रकारत्वाल्लक्षणसंगतिः रजतत्वभ्रमलक्षणस्य रजतत्वप्रमायामतिव्याप्तिवारणाय तदभाववदिति रङ्गत्वप्रमायामतिव्याप्तिवारणाय तत्प्रकारक इति इच्छायामतिव्याप्तिवारणायानुभव इति। ननु रङ्गरजतयोः इमे रङ्गरजते इति प्रमायामतिव्याप्तिः तत्र रजतत्वाभाववतो रङ्गत्वाभाववतश्च विशेष्यत्वात्। रजतत्वरङ्गत्वयोः प्रकारत्वाच्चेतिचेन्न तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारतानिरूपितप्रकारित्वे सत्यनुभवत्वस्य विवक्षितत्वेनातिव्याप्तेरभावात्।

---

१ तदभावश्च निरवच्छिन्नवृत्तिताकः प्रकारतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकश्च बोध्यः तेन "वृक्षः कपिसंयोगी" इति प्रमायाम् "पर्वतो वह्निमान्" इति प्रमायां च मूलदेशावच्छिन्नकपिसंयोगाभाववद्विशेष्यकत्वस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभाववद्विशेष्यकत्वस्य च सत्त्वेपि नातिव्याप्तिः।

यथार्थानुभवश्चतुर्विधः। प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। तत्करणमपि चतुर्विधम्। प्रत्यक्षानुमानोपमानशब्दभेदात्। व्यापारवदसाधारणं कारणं करणम्। अनन्यथासिद्धकार्यनियतपूर्ववृत्ति कारणम्। कार्यं प्रागभावप्रतियोगि।

यथार्थानुभवं विभजते—यथार्थेति। तत्करणं विभजते—तत्करणमपीति। करणलक्षणमाह—व्यापारवदिति। व्यापारवत्त्वेसत्यसाधारणकारणत्वं करणलक्षणं दण्डादिः घटं प्रति असाधारणकारणं चक्रभ्रमणरूपव्यापारवांश्च भवतीति लक्षणसमन्वयः तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारत्वं चक्रभ्रमणं दण्डजन्यं दण्डजन्यघटजनकं च अतस्तस्य व्यापारत्वं व्यापारवत्त्वानुक्तौ चक्रभ्रमणेतिव्याप्तिः असाधारणेत्यनुक्तौ कालेतिव्याप्तिः तत्र दण्डादेरपि व्यापारलक्षणाक्रान्तत्वात् अतस्तयोरुपादानम्। कारण लक्षणमाह—कार्येति। कार्य्यनियतत्वे[1] सति कार्य्यपूर्ववृत्तित्वं कारणलक्षणं रासभादावतिव्याप्तिवारणाय नियतेति कार्य्येऽतिव्याप्तिवारणाय पूर्ववृत्तीति।

---

१ नियतत्वमिह व्यापकत्वम्। तच्च कार्यतावच्छेदकसंबन्धेन कार्याधिकरणे कार्याव्यवहितप्राक्क्षणावच्छेदेन विद्यमानाऽत्यन्ताऽभावप्रतियोगिताऽनवच्छेदकधर्मवत्त्वम्।

कारणं त्रिविधम् । समवाय्यसमवायिनिमित्तभेदात् । यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । यथा तन्तवः पटस्य । पटश्च स्वगतरूपादेः ।

कारणं विभजते—कारणमिति । समवायिकारणलक्षणमाह—यत्समवेतमिति । यस्मिन्समवेतं यत्समवेतं निरूपितत्वं सप्तम्यर्थः समवेतं समवायसंबन्धावच्छिन्नवृत्तिताकं यन्निरूपितसमवायसंबन्धावच्छिन्नवृत्तिताकं सत्कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः।तथाच समवायसंबन्धावच्छिन्नकार्यनिष्ठकार्य्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणत्वं समवायिकारणलक्षणम् । फलितमुदाहरति—यथेति । पटो हि समवायसंबन्धेन तन्तुषूत्पद्यते पटनिष्ठा कार्य्यता समवायसंबन्धावच्छिन्ना तन्तवोपि पटं प्रति तादात्म्यसंबन्धेन कारणमिति लक्षणसमन्वयः।गुणकार्य्यस्थलमुदाहरति—पटश्चेति । आदिना क्रियादिग्रहः ।

कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति कारणम् असमवायिकारणम् । यथा तन्तुसंयोगः पटस्य । तन्तुरूपं पट रूपस्य ।

असमवायिकारणलक्षणमाह— कार्येणेति । स्वकार्य्येण सहैकस्मिन्नर्थे समवायसंबन्धेन वर्तमानं सद्

कारणं कारणेन स्वकार्य्यसमवायिकारणेन सहैकस्मिन्नर्थे वर्तमानं सत् कारणं वा असमवायि कारणमित्यर्थः । कार्य्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च असमवायिकारणं द्विविधमिति भावः । तथा च समवायसंबन्धावच्छिन्नकार्य्यतानिरूपितसमवायस्वसमवायिसमवेतत्वान्यतरसंबन्धावच्छिन्नकारणत्वम् असमवायिकारणलक्षणं फलितम् । कार्य्यैकार्थप्रत्यासत्त्याऽसमवायि कारणमुदाहरति-यथा तन्तुसंयोग इति।पटरूपकार्य्येण सह तन्तुसंयोगः तन्तुरूपार्थे समवायेन वर्तमानः पटं प्रति कारणं भवति तत्र पटवृत्तिकार्य्यता समवायसंबन्धावच्छिन्ना तन्निरूपिततन्तुसंयोगनिष्ठकारणता समवायसंबन्धावच्छिन्नेति लक्षणसंगतिः ।द्वितीयमुदाहरति—तन्तुरूपमिति। तत्र स्वकार्य्यपटरूपसमवायिकारणेन पटेन सह तन्तुरूपार्थे तन्तुरूपं समवेतं सत् कारणं भवति पटे रूपं समवायसंबन्धेन जायते पटरूपनिष्ठा कार्य्यता समवायसंबन्धावच्छिन्ना तन्तुरूपं स्वसमवायिसमवेतत्वसंबन्धेन पटनिष्ठं कारणं भवति कार्य्यकारणयोः सामानाधिकरण्यनियमात् अतस्तन्निष्ठकारणता स्वसमवायिसमवेतत्वसंबन्धावच्छिन्नेति लक्षणसंगतिः ।

तदुभयभिन्नं कारणं निमित्तकारणम् । यथा तुरीवेमादिकं पटस्य । तदेतत्त्रिविध-

कारणमध्ये यदसाधारणं कारणं तदेव करणम्।

निमित्तकारणं लक्षयति—तदुभयभिन्नमिति। समवायिकारणत्वासमवायिकारणत्वभिन्नकारणत्वं निमित्तकारण लक्षणं यथाश्रुते तुर्यादावव्याप्तिः तुर्यादीनामपि स्वगतरूपादिकं प्रति समवायिकारणत्वात् तन्तुतुरीयसंयोगादीनामपि तुरीपटसंयोगादिकं प्रति असमवायिकारणत्वात्। तदुदाहरति— यथातुरीति। यदसाधारणमिति। असाधारणमित्यस्य व्यापारवदित्यादि।

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम्। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तद्द्विविधम्। निर्विकल्पकं सविकल्पकंच।

प्रत्यक्षप्रमाणस्य लक्षणमाह— प्रत्यक्षेति। प्रत्यक्षप्रमानिरूपितकरणत्वं प्रत्यक्षलक्षणं दुष्टेन्द्रियेतिव्याप्तिवारणाय प्रमेति। प्रत्यक्षप्रमालक्षणमाह— इन्द्रियार्थेति। आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षम्। प्रत्यक्षं विभजते— तद्द्विविधमिति।

तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्। यथेदं किंचित्। सप्रकारकं ज्ञानं सविकल्पकम्। यथा डित्थोयं ब्राह्मणोयं श्यामोऽयमिति।

निर्विकल्पकं लक्षयति—निष्प्रकारकमिति। प्रकारताद्यनिरूपकत्वे सति ज्ञानत्वं लक्षणम्। ननु निर्विकल्पकज्ञाने किं प्रमाणमिति चेन्न विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दण्डीति विशिष्टज्ञानवत् इत्यनुमानस्यैव प्रमाणत्वात्। सविकल्पकं लक्षयति—सप्रकारमिति। प्रकारतादिनिरूपकत्वे सति ज्ञानत्वं लक्षणम्। उदाहरति—यथा डित्थोयमित्यादिना। डित्थोयमित्यादिज्ञानस्य डित्थत्वादिनिष्ठप्रकारतादिनिरूपकत्वाल्लक्षणसंगतिः।

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः। संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणविशेष्यभावश्चेति।

इन्द्रियार्थसन्निकर्षं विभजते—इन्द्रियार्थेति। संगतिप्रदर्शनाय प्रत्यक्षेत्यादि।

घटप्रत्यक्षजनने संयोगः सन्निकर्षः। घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः। चक्षुःसंयुक्ते घटे रूपस्य समवायात्। रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवा-

---

१ नचेदमप्रयोजकम् विशिष्टज्ञानविशेषणज्ञानयोः—कार्यकारणभावस्यैव अनुकूलतर्कत्वात्।

यः सन्निकर्षः चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् । श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः कर्णविवरवृत्त्याकाशस्य श्रोत्रत्वाच्छब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात् । शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् । अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् ।

तत्र तेषु षड्विधेषु घटप्रत्यक्षजनन इति । घटशब्दो द्रव्यमात्रोपलक्षकः घटरूपेति । द्रव्यसमवेतेत्यर्थः । रूपत्वसामान्येति । द्रव्यसमवेतसमवेतप्रत्यक्ष इत्यर्थः । श्रोत्रेणशब्दत्वसाक्षात्कारइति । इदं कत्वादीनामप्युपलक्षणम् । विशेषणविशेष्यभावं प्रदर्शयति—अभावप्रत्यक्षइति । तदुपपादयति—घटाभाववदित्यादिना । तथाच तादृशस्थले चक्षुर्घटाभावयोः संयुक्तविशेषणतासंबन्धः भूतले घटाभाव इत्यत्र संयुक्तविशेष्यतासंबन्धः अधिकरणवाचकसप्तम्यन्त पदसमभिव्याहारस्थले आधेयस्य विशेष्यत्वात् । एवं शुक्लरूपं कृष्णत्वाभाववत् इत्यत्र संयुक्तसमवेतविशेषणतासंबन्धः चक्षुःसंयुक्ते घटे शुक्लरूपं समवेतं तत्र कृष्णत्वाभाव-

स्य विशेषणत्वात् शुक्लत्वे कृष्णत्वाभावप्रत्यक्षे संयुक्तसमवेतसमवेतविशेषणतासंबन्धः चक्षुःसंयुक्तघटसमवेतशुक्ले शुक्लत्वं समवेतं तत्र कृष्णत्वाभावस्य विशेषणत्वात्। ककारे खत्वाभावप्रत्यक्षे समवेतविशेषणतासन्निकर्षः कर्णशष्कुल्यवच्छिन्नाकाशरूपश्रोत्रसमवेते ककारे खत्वाभावस्य विशेषणत्वात्। कत्वे खत्वाभावप्रत्यक्षे समवेतसमवेतविशेषणतासन्निकर्षः घटाभावे पटाभावप्रत्यक्षे संयुक्तविशेषणविशेषणतासन्निकर्षः चक्षुःसंयुक्तभूतले विशेषणभूते घटाभावे पटाभावस्य विशेषणत्वात्। कत्वाभावे खत्वाभावप्रत्यक्षे समवेतविशेषणविशेषणतासन्निकर्षः एवमन्यदप्यूह्यम्।

एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम्। तत्करणमिन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।

प्रत्यक्षमुपसंहरति—एवमिति। प्रत्यक्षप्रमाणलक्षणं लक्ष्ये संगमयति—तत्करणमिति। प्रत्यक्षप्रमाणमुपसंहरति—तस्मादिति।

इति तर्कसंग्रहे प्रत्यक्षखण्डं समाप्तम्॥

इति लघुबोधिन्यां प्रत्यक्षखण्डः समाप्तः॥

अथ अनुमानखण्डम् ।

अनुमितिकरणमनुमानम् । परामर्शजन्यं ज्ञानमनुमितिः ।

अथानुमानं निरूप्यते—अनुमितिकरणमनुमानमिति । अनुमितिनिरूपितकरणत्वम् अनुमानस्य लक्षणम् । अनुमितिं लक्षयति—परामर्शेति । परामर्शजन्यत्वे सति ज्ञानत्वं लक्षणं प्रत्यक्षादावतिव्याप्तिवारणाय परामर्शेति परामर्शध्वंसेऽतिव्याप्तिवारणाय ज्ञानत्वम् । ननु वह्निव्याप्यधूमवत्पर्वतज्ञानवानहमिति परामर्शप्रत्यक्षेऽतिव्याप्तिवारणाय परामर्शत्वावच्छिन्नजनकतानिरूपितजन्यताशालित्वमिति वक्तव्यं तथा सति परामर्शस्य स्वप्रत्यक्षं प्रति विषयत्वेन कारणत्वात् तन्निष्ठकार्य्यतानिरूपितपरामर्शनिष्ठकारणतायाः विषयत्वावच्छिन्नत्वेन परामर्शत्वावच्छिन्नकारणतानिरूपितकार्य्यताविरहान्नातिप्रसङ्गः । एवं च ध्वसं प्रति प्र-

---

१ अथ शब्दः प्रक्रान्तक्रियानन्तर्यवाचकः । तच्च प्रकृते प्रत्यक्षनिरूपणध्वंसाधिकरणक्षणवृत्तित्वम् । तस्य पूर्वप्रदर्शितनिरूपणे अन्वयः । कर्माख्यातस्य विषयत्वमर्थः तस्य अनुमाने अन्वयः । तथाच प्रत्यक्षनिरूपणप्रतियोगिकध्वंसाधिकरणक्षणवृत्तिनिरूपणनिरूपितविषयतावदनुमानमेकत्ववदिति बोधः । निरूपणस्य सविषयकत्वाऽभावेपि निरूपणघटकव्यापारप्रयोज्यतादृशज्ञानस्य सविषयकत्वात् तदनुबन्धिविषयतायाः अनुमाने सत्त्वात् नाऽनुपपत्तिः ।

तियोगिनः प्रतियोगित्वेनैव कारणत्वान्निरुक्तकारणतानिरूपितकार्य्यतायाः परामर्शध्वंसेऽभावेनातिव्याप्तिविरहात् ज्ञानपदं व्यर्थमिति चेन्न इष्टापत्तेः। नच तथापि वह्निव्याप्यधूमवत्पर्वतवान् अयं देश इति विशिष्टवैशिष्ट्यावगाहिज्ञानेतिव्याप्तिः तत्रापि वह्निव्याप्यधूमवान् पर्वत इति निश्चयस्य परामर्शरूपस्य तादृशनिश्चयत्वेन कारणतया निरुक्तानुमितिलक्षणस्य सत्त्वात् विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयस्य तादृशनिर्णयत्वेन कारणत्वादिति वाच्यम् अनुमि[1] तित्वजातिमत्त्वस्य लक्षणत्वात्। परामर्शजन्येत्यनेन अनुमितित्वजातौ प्रमाणं सूचितं तथाहि परामर्शनिष्ठजनकतानिरूपिताऽनुमितिनिष्ठजन्यता किंचिद्धर्मावच्छिन्ना जन्यतात्वात् घटनिष्ठजन्यतावदिति।

---

१ ननु अनुमितित्वजातेः लक्षणत्वाङ्गीकारे पक्षतावच्छेदकहेत्वोः ऐक्येन "घटोघटः" इतिवत् उपनयवाक्याच्छाब्दबोधाऽनुपपत्तिरितिचेन्न तयोरैक्येपि इतरभेदव्याप्याऽनुमितित्ववदभिन्नाऽनुमितिरित्याकारकस्य उपनयजन्यस्य विधेयांशे अधिकावगाहिनः शाब्दबोधस्य नवीनैरङ्गीकृतत्वेन अनुपपत्त्यभावात्। यदि उदाहरणवाक्यादेव व्याप्तिलाभादुपनयेनापि तत्प्रतिपादने पौनरुक्त्यमिति पक्षे हेतुमत्तामात्रमेवोपनयेन बोधनीयम्। तथासति तथाचायमित्युपनयवाक्याच्छाब्दबोधानुपपत्तिस्तदवस्थैवेति विभाव्यते तदा व्याप्तिज्ञानकरणकवृत्त्यनुभवत्वव्याप्यजातिमत्त्वं लक्षणमिह ज्ञेयम्। अनुभवत्वव्याप्यत्वं च अनुभवत्वन्यूनवृत्तित्वम्। तेन प्रत्यक्षादौ न क्षतिः।

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । यथा वह्निव्याप्यधूमवान् अयं पर्वत इति ज्ञानं परामर्शः ।

परामर्शं लक्षयति- व्याप्तीति । व्याप्तिविशिष्टं च तत्पक्षधर्मताज्ञानं चेति कर्मधारयः व्याप्तिविशिष्टत्वं च व्याप्तिप्रकारकत्वं तथाच व्याप्तिप्रकारकत्वे सति पक्षधर्मताज्ञानत्वं लक्षणं वह्निव्याप्यधूमवानयं पर्वतः इति परामर्शस्य धूमांशे व्याप्तेः प्रकारत्वात् धूमस्य पर्वतवृत्तित्वरूपपक्षधर्मतावगाहित्वाच्च लक्षणसंगतिः । नच वह्निव्याप्यो धूमः घटवान् पर्वतः इति ज्ञानेऽतिव्याप्तिरिति वाच्यं व्याप्तिनिष्ठप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितप-

---

१ व्याप्तिविशिष्टे पक्षधर्मतेति सप्तमीतत्पुरुषाभ्युपगमे व्यभिचारिहेतुकानुमितौ व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वाभावेन अव्याप्तिरतः कर्मधारय इति भावः ।

२ इत्थं निवेशः प्रकारताविशेष्यतयोः अभेदवादिमताभिप्रायेण । भट्टाचार्यमते तु व्याप्तिप्रकारतानिरूपितविशेष्यतावच्छिन्नप्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वेन निवेशः।एकानिष्ठप्रकारताविशेष्यतयोः अभेदवादिना अवच्छेदकभावस्वीकारात् । विशेष्यताप्रकारतयोः अभेदस्वीकारे रक्तदण्डवानिति बुद्धौ रक्तरूपविशेष्यकदण्डाभावनिश्चयप्रतिबध्यत्वापत्तेः । दण्डप्रकारतानिरूपितरक्तरूपनिष्ठविशेष्यताशालित्वात् तादृशबुद्धेः इति ध्येयम् ।

क्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयत्वस्य विवक्षितत्वात् । परामर्शस्वरूपमाह—यथेति ।

तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः ।

अनुमितिस्वरूपमाह- तज्जन्यमिति ।

यत्र यत्र धूमःतत्राग्निरिति साहचर्यनियमो व्याप्तिः ।

व्याप्तिलक्षणमाह—साहचर्य्यनियमइति । यत्र यत्र धूमस्तत्राग्निरिति व्याप्तिस्वरूपाऽभिलापःसाहचर्य्यनियमो नियतसाहचर्य्यं नियतत्वं व्यापकत्वं साहचर्य्यं सामानाधिकरण्यं व्यापकसामानाधिकरण्यं लक्षणं तथांच हेत्वधिकरणवृत्त्यत्यन्ताभावाऽप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः । वह्निमान् धूमात् इत्यादौ धूमाधिकरणे पर्वतादौ वर्तमानो घटात्यन्ताभावः तत्प्रतियोगी घटः तदप्रतियोगि वह्निरूपसाध्यं तत्सामानाधिकरण्यं धूमेऽस्तीति लक्षण संगतिः । धूमवान् वह्नेः इत्यादौ वह्निरूपहेत्वधिकरणे अयोगोलके वर्तमानो धूमाभावःतत्प्रतियोगि धूमरूपसाध्यं भवतीति नातिव्याप्तिः । हेतुतावच्छेदकसंबन्धेन हेत्वधिकर-

---

१ व्यापकसामानाधिकरण्यं साध्याभाववदवृत्तित्वस्वरूपं न संभवति इदं वाच्यं ज्ञेयत्वादित्यादौ स्वरूपसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या अव्याप्तेः । अतस्तत्प्रकारान्तरेणाह—तथाचेत्यादिना ।

णं बोध्यं तेन समवायेन धूमाधिकरणे धूमावयवे वह्न्यभावसत्त्वेपि नाव्याप्तिः[1]। हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणं बोध्यं तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्तावत्त्वात् इत्यादौ विशिष्टं शुद्धान्नातिरिच्यते इतिन्यायेन विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्याच्छुद्धसत्ताधिकरणे गुणे द्रव्यत्वाभावसत्त्वेपि नाव्याप्तिः विशिष्टस्य शुद्धाभिन्नत्वेपि गुणकर्मान्यत्वविशिष्टसत्तात्वावच्छिन्नाधिकरणतायाः गुणेऽभावात् यत्र विशेषणविशेष्योभयाधिकरणत्वं तत्रैव विशिष्टाधिकरणत्वनियमात्। हेत्वधिकरणवृत्तित्वं च अभावस्य स्वरूपसंबन्धेन[2] बोध्यं तेन संयोगेन धूमाधिकरणे पर्वतादौ कालिकसंबन्धेन वह्न्यभावसत्त्वेपि नाव्याप्तिः[3] तादृशाभावीयप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यमर्थः। तेन वह्निमान् धूमात् इत्यादौ धूमाधिक-

---

१ इदं वाच्यं ज्ञेयत्वादित्यादौ लक्षणसमन्वयसंभवात् नासंभवः। इत्यतोऽव्याप्तिरभिहिता।

२ तत्तत्संबन्धपरिचायकाऽभावीयवृत्तितायटकसंबन्धप्रतिफलितेन स्वरूपसंबन्धेनेत्यर्थः। लक्षणे वृत्तित्वं च स्वप्रतियोगिमत्ताग्रहविरोधितायटकसंबन्धावच्छिन्नं बोध्यम् स्वरूपसंबन्धावच्छिन्नत्वानिवेशे घटभिन्नं द्रव्यत्वादित्यादावतिव्याप्तिः।

३ घटभिन्नम् आत्मत्वात् इत्यादौ लक्षणसमन्वयेन असंभवाभावात् अव्याप्तिरिति।

रणपर्वतादौ महानसीयवह्न्यभावसत्त्वेन तादृशाभावप्रतियोगित्वेपि नाव्याप्तिः तत्र महानसीयत्वविशिष्टवह्नित्वस्य प्रतियोगितावच्छेदकत्वेन केवलवह्नित्वरूपसाध्यतावच्छेदकस्य तदनवच्छेदकत्वात् तादृशाभावीयप्रतियोगिता साध्यतावच्छेदकसंबन्धावच्छिन्ना ग्राह्या तेन वह्निमान् धूमात् इत्यादौ धूमाधिकरणपर्वतादौ समवायसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावसत्त्वेपि नाव्याप्तिः ।

व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ।

पक्षधर्मतास्वरूपमाह—व्याप्यस्येति ।

अनुमानं द्विविधम् स्वार्थं परार्थं च । स्वार्थं स्वानुमितिहेतुः । तथाहि स्वयमेव भूयो भूयो दर्शनेन यत्र यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गत्वा तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति । यत्र धूमस्तत्राग्निरिति ।

अनुमानं विभजते—अनुमानमिति । स्वार्थशब्दार्थमाह—स्वार्थं स्वानुमितिहेतुरिति । स्वार्थानुमानं दर्शि-

---

१ तादृशाभावप्रतियोगितावच्छेकतापर्याप्त्यनवच्छेदकत्वादित्यर्थः । पर्याप्तिनिवेशमन्तरा दोषाऽनिवृत्तेः । निवेशप्रकारश्च निरुक्ताऽभावप्रतियोगितावच्छेदकतापर्याप्त्यनवच्छेदकं यत्साध्यतावच्छेदकतापर्याप्त्यवच्छेदकं तदवच्छिन्नेत्यादिरीत्या बोध्यः ।

यितुं भूमिकां रचयति—स्वयमेवेत्यादिना । भूयो भूयो दर्शनेन बहुष्वधिकरणेषु साहचर्यदर्शनेन व्याप्तिं गृहीत्वा धूमे वह्निव्याप्तिं गृहीत्वा पर्वते धूमं पश्यन् व्याप्तिं स्मरतीति । एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति नियमादिति भावः तदनन्तरं व्याप्तिज्ञानानन्तरं तस्मात्परामर्शात् अत्र व्याप्तिज्ञानं करणं परामर्शो व्यापारः व्याप्तिज्ञानस्य परामर्शं प्रति विशेषणज्ञानविधया हेतुत्वात्तज्जन्यं पर्वतो वह्निमानिति अनुमितिज्ञानं फलम् ।

तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते । अयमेव लिङ्गपरामर्श इत्युच्यते । तस्मात् पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते । तदेतत्स्वार्थानुमानम् । यत्तु स्वयं धूमादग्निमनुमाय परंप्रति बोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते । तत्परार्थानुमानम् ।

परार्थानुमानं दर्शयति—यत्त्विति । पञ्चावयववाक्यमित्यनेनान्वयः । धूमादग्निमनुमायेति । धूमलिङ्गका-

---

१ व्यभिचारज्ञानविरहसहकृतेन साहचर्यदर्शनेनेत्यर्थः अन्यथा पार्थिवत्वलोहलेख्यत्वयोः शतशः सहचारदर्शनेपि मण्यादौ व्यभिचारदर्शनेन तस्य व्याप्तिग्राहकत्वानुपपत्तेः ।

ग्निसाध्यकानुमित्यनन्तरमित्यर्थः पञ्चावयववाक्यं प्रयुङ्क्ते पञ्चावयववाक्यप्रयोक्ता भवति । तत्परार्थानुमानमिति । तादृशपञ्चावयववाक्यप्रयोज्यमानसपरामर्शव्यापारकं तादृशमानसव्याप्तिज्ञानं परार्थानुमानमित्यर्थः ।

यथा पर्वतो वह्निमान् । धूमवत्त्वात् । यो यो धूमवान् स स वह्निमान् यथा महानसम् । तथाचायम् । तस्मात्तथेति । अनेन प्रतिपादिताल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते ।

पञ्चावयववाक्यमुदाहरति—पर्वतोऽग्निमानित्यादिना । अनेनेति । अत्रेदं शब्देन पञ्चावयववाक्यं परामृश्यते प्रयोज्यत्वं तृतीयार्थः प्रतिपादितात् मानसपरामर्शरूपप्रतिपत्तिविषयात् अग्निं प्रतिपद्यते अग्निसाध्यकानुमित्याश्रयो भवति तथाच एतत्पञ्चावयववाक्यप्रयोज्यमानसपरामर्शविषयधूमजन्याग्निसाध्यकानुमित्याश्रयो भवतीति वाक्यार्थः ।

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः । पर्वतो वह्निमानिति प्रतिज्ञा । धूमवत्त्वादिति हेतुः । यो यो धूमवानित्युदाहरणम् । तथा चायमित्युपनयः । तस्मात्तथेति निगमनम् ।

पञ्चावयववाक्यघटकवाक्यानां नामनिर्देशपूर्वकं लक्ष-

णमाह—प्रतिज्ञेत्यादिना । पर्वतोवह्निमानितीति । साध्यवत्तया[1] पक्षज्ञानजनकवाक्यं प्रतिज्ञेत्यर्थः पञ्चम्यन्तहेतुप्रतिपादकं[2] वाक्यं हेतुः व्याप्यवत्तया[3] व्यापकवद्वचनम् उदाहरणं व्याप्यहेतुमत्तया पक्षवचनम्[4] उपनयः अबाधितत्वादियुक्तसाध्यवत्तया[5] पक्षवचनं निगमनम् ।

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम् ।

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणमितीदं नवीनमताभिप्रायेण तन्मते हि फलाऽयोगव्यवच्छिन्नं कारणं करणमित्युच्यते येन फलाऽसंबन्धो व्यवच्छिद्यते तत्करणमित्यर्थः यस्मिन्कारणे सति फल-

---

१ साध्यतावच्छेदकावच्छिन्नप्रकारताकपक्षतावच्छेदकावच्छिन्नबोधजनकवाक्यमित्यर्थः। उदाहरणात् साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानं न पक्षतावच्छेदकविशिष्टे । उपनयाच्च पक्षतावच्छेदकविशिष्टे न साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानमिति तयोर्निरासः ।

२ पञ्चम्यन्तत्वे सति हेतुप्रतिपादकवाक्यत्वमित्यर्थः।

३ प्रकृतहेतुमति प्रकृतहेतुव्यापकत्वविशिष्टसाध्यबोधकवाक्यमित्यर्थः ।

४ पक्षतावच्छेदकविशिष्टविशेष्यकप्रकृतसाध्यव्याप्यहेतुप्रकारकबोधजनकवाक्यमित्यर्थः ।

५ हेतुज्ञानज्ञाप्यत्वाऽबाधितत्वादिविशिष्टसाध्यप्रकारकपक्षविशेष्यकज्ञानजनकवाक्यमित्यर्थः ।

मविलम्बेन जायते तत्करणमिति यावत् परामर्शे सत्यनुमितिविलम्बाऽभावात् परामर्श एव करणम् ।

तस्माल्लिङ्गपरामर्शोऽनुमानम् ।

अनुमानमुपसंहरति—तस्मादिति । यद्वा लिङ्गपरामर्श एव करणमिति लिङ्गविशेष्यकव्याप्तिप्रकारकज्ञानमेवेत्यर्थः एवकारेण लिङ्गव्यवच्छेदः अतीतानागतस्थलेऽनुमित्यनापत्तेः ।

लिङ्गं त्रिविधम् । अन्वयव्यतिरेकि । केवलान्वयि । केवलव्यतिरेकि चेति ।

लिङ्गं विभजते—लिङ्गमिति ।

अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि । यथा वन्हौ साध्ये धूमवत्त्वम् । यत्र धूमस्तत्राग्निः यथा महानसमित्यन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोपि नास्ति यथा महाह्रदः इति व्यतिरेकव्याप्तिः ।

अन्वयव्यतिरेकिणमाह— अन्वयेनेति । अन्वयनिरूपितव्याप्तिमत्त्वे सति व्यतिरेकनिरूपितव्याप्तिमत्त्वं लक्षणम् अन्वयव्याप्तिः पूर्वमुक्ता व्यतिरेकव्याप्तिस्तु साध्याभावव्यापकीभूताभावप्रतियोगित्वम् । तमुदाहरति—

यथा वह्नौ साध्ये धूमवत्त्वमिति। यत्र धूमस्तत्राग्निरिति । धूमव्यापकवह्निसामानाधिकरण्यमित्यर्थः । यत्र वह्निर्नास्तीति । वह्न्यभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः ।

अन्वयमात्रव्याप्तिकं केवलान्वयि । यथा घटोऽभिधेयः प्रमेयत्वात् पटवत् । अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्य प्रमेयत्वादभिधेयत्वाच्च ।

केवलान्वयि[1]नमाह— अन्वयमात्रव्याप्तिकमिति । व्यतिरेकव्याप्तिशून्यत्वे सत्यन्वयव्याप्तिमत्त्वं लक्षणम् । तमुदाहरति—यथेति । लक्षणं गमयति—अत्रेत्यादिना ।

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि यथा पृथ्वीतरेभ्यो भिद्यते गन्धवत्त्वात् । यदितरेभ्यो न भिद्यते न तद्गन्धवत् यथा जलम् । न चेयं तथा । तस्मान्न तथेति । अत्र यद्गन्धवत्तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् ।

सन्दिग्धसाध्यवान् पक्षः । यथा धूमवत्त्वे हेतौ पर्वतः ।

---

१ निरवच्छिन्नवृत्तिमदत्यन्ताभावाऽप्रतियोगित्वं केवलान्वयित्वम् । संयोगाभावगगनाभावयोः संग्रहाय निरवच्छिन्नवृत्तिमदिति ।

केवलव्यतिरेकिणमाह— व्यतिरेकमात्रेति । उदाहरति— यथापृथिवीति । तदुपपादयति— अत्रेति । पृथिव्यां साध्यस्य सन्देहात् साहचर्य्यज्ञानं न संभवतीति भावः । पक्षलक्षणमाह— संदिग्धेति । साध्यप्रकारकसंशयविषयत्वं पक्षलक्षणम् । नव्यास्तु सिषाधयिषाविरहविशिष्टसिध्यभावः पक्षता सिषाधयिषा अनुमिनोमीतीच्छा सिद्धिः पक्षे साध्यनिश्चयः पर्वतो वह्निमान् इत्यनुमितिं प्रति तादृशनिश्चयः प्रतिबन्धकः सिद्धिसत्त्वे सिषाधयिषासत्त्वेच अनुमितिर्जायते इति सिषाधयिषाविरहविशिष्टेत्युक्तं तथाच यत्र सिद्धिः सिषाधयिषाच तत्र सिषाधयिषाविरहविशिष्टसिद्ध्यभावसत्त्वात् अनुमितिरित्याहुः ।

निश्चितसाध्यवान् सपक्षः । यथा तत्रैव महानसम् ।

सपक्षलक्षणमाह—निश्चितेति । साध्यप्रकारकनिश्चयविशेष्यत्वं लक्षणम् ।

---

१ विशेष्यतासंबन्धेन साध्यप्रकारकसंशयविशिष्टत्वम् । वस्तुतः अनुमितिनिरूपितोद्देश्यताख्यविषयताश्रयत्वम् लक्षणं बोध्यम् ।

२ विशेषणाभावप्रयुक्तविशिष्टाभावस्य विशेष्याभावप्रयुक्तविशिष्टाभावस्य उभयाभावप्रयुक्तविशिष्टाभावस्य च अनुभवसिद्धत्वादिति भावः ।

निश्चितसाध्याभाववान् विपक्षः। यथा तत्रैव महाहृदः।

विपक्षलक्षणमाह— निश्चितसाध्याभाववानिति।

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः। सव्यभिचारोऽनैकान्तिकः। स त्रिविधः। साधारणाऽसाधारणाऽनुपसंहारिभेदात्।

हेत्वाभासान् विभजते—सव्यभिचारेति। हेत्वाभासा इति। हेतुवदाभासन्ते इति व्युत्पत्त्या दुष्टहेतव इत्यर्थः तथाच व्यभिचारादिदोषान्यतमवत्त्वं सामान्यलक्षणम्। सव्यभिचारोऽनैकान्तिक इति। सव्यभिचार एवाऽनैकान्तिकशब्दवाच्य इत्यर्थः साधारणाद्यन्यतमत्वं सव्यभिचारलक्षणम्। तं विभजते—स त्रिविध इति।

तत्र साध्याभाववद्वृत्तिः साधारणोनैकान्तिकः। यथा पर्वतो वह्निमान् प्रमेयत्वात्

---

१ विभागे शिष्यजिज्ञासायाः प्रयोजकत्वेन जिज्ञासां प्रति लक्षणात्मकसाधारणज्ञानस्य हेतुत्वात् तदनुक्त्वा दुष्टहेतुविभागोऽनुपपन्नः अतः दुष्टसामान्यलक्षणमाह—तथाचेत्यादिना। नच तदपि दोषसामान्यलक्षणं विना न संभवतीति वाच्यम् हेत्वाभासपदस्य हेतोराभासा इति व्युत्पत्तिदशायामाभासपदवाच्यदोषसामान्यलक्षणं किमिति जिज्ञासया तल्लक्षणस्य स्फुटत्वात्।

इति। प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात्।

साधारणलक्षणमाह— तत्रेति। साध्याभाववद्वृत्तित्वं लक्षणं धूमवान्वह्नेः इत्यत्र धूमाभाववत्ययोगोलके वह्नेः सत्त्वाल्लक्षणसमन्वयः साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाऽभावो बोध्यः तेन वह्निमान् धूमादित्यादौ समवायेन वह्न्यभावस्य महानसीयवह्न्यभावस्य च पर्वतादौ सत्त्वेपि नातिव्याप्तिः साध्याभाववत्त्वं च स्वरूपसंबन्धेन बोध्यं तेन पर्वतादौ कालिकसंबन्धेन वह्न्यभावसत्त्वेपि नातिव्याप्तिः साध्याभाववद्वृत्तित्वं च हेतोर्हेतुतावच्छेदकसंबन्धेन बोध्यं तेन वह्निमान् धूमादित्यादौ वह्न्यभाववति कालिकसंबन्धेन धूमसत्त्वेपि नातिव्याप्तिः। साधारणाऽनैकान्तिकमुदाहरति— पर्वतो वह्निमानिति। वह्निरूपसाध्याभाववति ह्रदादौ प्रमेयत्वस्य सत्त्वाद्व्यभिचारीत्यर्थः।

सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः। यथा शब्दो नित्यः शब्दत्वादिति। शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति।

असाधारणलक्षणमाह—सर्वेति। सद्धेतावतिव्याप्तिवारणाय सपक्षेति विरुद्धेतिव्याप्तिवारणाय विपक्षेति साधना-

प्रसिद्ध्यादावतिव्याप्तिवारणाय पक्षेति। असाधारणमुदाहरति— यथेति। लक्षणमुपपादयति—शब्दत्वमिति।

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि पक्षत्वाद्दृष्टान्तो नास्ति।

अनुपसंहारिणं लक्षयति— अन्वयव्यतिरेकेति।[1] अन्वयदृष्टान्तरहितत्वे सति व्यतिरेकदृष्टान्तरहितत्वं लक्षणं केवलव्यतिरेकिणि केवलान्वयिनि च सद्धेतावतिव्याप्तिवारणाय विशेष्यविशेषणोभयोपादानम्। तमुदाहरति—यथेति। लक्षणमुपपादयति—अत्रेति।

साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा शब्दो नित्यः कृतकत्वादिति। कृतकत्वं हि नित्यत्वाभावेनाऽनित्यत्वेन व्याप्तम्।

विरुद्धलक्षणमाह— साध्याभावव्याप्त इति।[2] स्वसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकसाध्याभा-

---

१ अन्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिशून्यत्वमर्थः। किंचिद्विशेष्यकनिश्चयाऽविषयसाध्यकत्वे सति किंचिद्विशेष्यकनिश्चयाऽविषयसाध्याभावकत्वमर्थः। इत्यपि केचित्।

२ स्वसमानाधिकरणात्यन्ताभावाऽप्रतियोगिसाध्याभावकत्वविवक्षणे शब्दो नित्यः कार्यत्वात् इत्यादौ स्वपदोपादेयकार्यत्वसमानाधिकरणनित्यत्वाभावगगनोभयाभावीयप्रतियोगितायाः साध्याभावे सत्त्वादसंभवः। अतः तादृशाभावीयप्रतियोगितानवच्छेदकपर्यन्तानुधावनम्। साध्यव्यापकीभूताभावप्रतियोगी हेतुर्विरुद्धः इत्यपि लक्षणान्तरम्।

वत्वकत्वं लक्षणम् । विरुद्धमुदाहरति—यथेति। लक्षणमुपपादयति—कृतकत्वंहीति ।

यस्य साध्याऽभावसाधकं हेत्वन्तरं स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववदिति शब्दोऽनित्यः कार्यत्वाद्धटवदिति।

सत्प्रतिपक्षं निरूपयति—यस्येति । स्वसाध्याभावव्याप्यस्वभिन्नहेतुमत्पक्षकत्वं सत्प्रतिपक्षलक्षणं यथा शब्दो नित्यः श्रावणत्वादित्यत्र शब्दोऽनित्यः कार्य्यत्वादित्युक्ते श्रावणत्वरूपहेतोः स्वसाध्यनित्यत्वाभावव्याप्यकार्य्यत्ववान् शब्दो भवतीति लक्षणसंगतिः । तमुदाहरति—यथेति ।

असिद्धस्त्रिविधः। आश्रयासिद्धःस्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति।

असिद्धं विभजते— असिद्धस्त्रिविध इति। आश्रयासिद्धाद्यन्यतमत्वं सामान्यलक्षणं बोध्यम्।

आश्रयासिद्धो यथा । गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत् । अत्र गगनारविन्दमाश्रयः सच नास्त्येव।

आश्रयासिद्धमुदाहरति—आश्रयासिद्धो यथेति ।

---

१ विरुद्धेऽतिव्याप्तिवारणाय स्वभिन्नत्वं हेतुविशेषणम्।

पक्षतावच्छेदकाभाववत्पक्षकत्वमाश्रयासिद्धलक्षणम् अत्र गगनारविन्दरूपपक्षे गगनीयत्वरूपपक्षतावच्छेदकं नास्तीति लक्षणसंगतिः । लक्षणमुपपादयति—अत्रेति ।

स्वरूपासिद्धो यथा । शब्दो गुणश्चाक्षुषत्वात् । अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात् ।

स्वरूपासिद्धं लक्षयति—स्वरूपासिद्धो यथेति हेत्वभाववत्पक्षकत्वं[2] स्वरूपासिद्धलक्षणं शब्देहि चाक्षुषत्वरूपहेतुरेव नास्ति तस्य श्रावणत्वात् । एतदुपपादयति—अत्रेति । साध्यतावच्छेदकाभावविशिष्टं साध्यं साध्याऽप्रसिद्धिः यथा पर्वतः काञ्चनमयवह्निमानित्यादौ वह्नौ काञ्चनमयत्वरूपं साध्यतावच्छेदकं नास्ति एवं हेतुतावच्छेदकाभावविशिष्टहेतुः साधनाऽप्रसिद्धिः यथा पर्वतो वह्निमान् काञ्चनमयधूमादित्यादौ धूमे काञ्चनमयत्वं नास्ति ।

---

१ पक्षतावच्छेदकताघटकसंबन्धावच्छिन्नपक्षतावच्छेदकत्वावच्छिन्नप्रतियोगिताकाभाववत्पक्षकत्वमित्यर्थः । यथाश्रुते वह्निमान् धूमात् इत्यादौ पक्षतावच्छेदकस्य संयोगेन पक्षतावच्छेदकगगनोभयत्वेन च अभावमादाय अतिव्याप्तेः ।

२ हेतुतावच्छेदकसंबन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववत्पक्षकत्वमित्यर्थः । अन्यथा समवायसंबन्धावच्छिन्नहेतुनिष्ठप्रतियोगिताकव्यासज्यवृत्तिधर्मावच्छिन्नहेतुनिष्ठप्रतियोगिताकाभाववत्पक्षकत्वस्य सद्धेतौ सत्त्वादतिव्याप्तेः । एवमुत्तरत्र साध्याऽप्रसिद्ध्यादिलक्षणे बोध्यम् ।

सोपाधिको हेतुर्व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाऽव्यापकत्वमुपाधिः। साध्यसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठाऽत्यन्ताभावप्रतियोगित्वं साधनाऽव्यापकत्वम्। पर्वतो धूमवान् वह्निमत्त्वादित्यत्र आर्द्रेन्धनसंयोग उपाधिः।

व्याप्यत्वासिद्धं लक्षयति—सोपाधिकइति। प्रकृतसाध्यव्याप्यताऽनवच्छेदकहेतुतावच्छेदकं व्याप्यत्वासिद्धिः तद्वत्त्वं व्याप्यत्वासिद्धस्य लक्षणमिति फलितम् उपाधिज्ञानेन हि व्यभिचारित्वमनुमीयते यथा पर्वतो धूमवान् वह्नेरित्यत्र वह्निर्धूमव्यभिचारी धूमव्यापकाऽऽर्द्रेन्धनव्यभिचारित्वात् यत्र यद्व्यापकव्यभिचारित्वं तत्रतद्व्यभिचारित्वं यथा घटत्वं घटत्वे रूपत्वव्यापकगुणत्वव्यभिचारित्वात् रूपत्वव्यभिचारित्वम् एवं हेतौ व्यभिचारित्वे ज्ञाते हेतुतावच्छेदकं व्याप्यतानवच्छेदकमिति ज्ञायते। उपाधिंलक्षयति-साध्यव्यापकत्वेसतीति। विशेषणाऽनुपादाने धूमवान् वह्नेरित्यादौ घटादावतिव्याप्तिः तावन्मात्रोक्तौ वह्निसंयोगादावतिव्याप्तिः अतो विशेषणविशेष्ययोरुभयोरुपादानम्। साध्यव्यापकत्वस्वरूपमाह—साध्यसमानाधिकरणेति। साधनाऽव्यापकत्वस्वरूपमाह— साधनवन्निष्ठेत्यादिना।

तथाच साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं साधनवन्निष्ठात्यन्ताऽभावप्रतियोगितावच्छेदकं यद्धुपाधितावच्छेदकं तद्वत्त्वमित्यर्थः यथाश्रुते धूमाधिकरणपर्वतादिवृत्त्यार्द्रेन्धनघटोभयाभावप्रतियोगित्वात् आर्द्रेन्धनस्य वह्निमन्निष्ठसंयोगघटोभयाभावप्रतियोगित्वात् केवलसंयोगस्य दोषोऽत एवमुक्तम् । उपाधिमुदाहरति—पर्वतो धूमवानित्यादिना । आर्द्रेन्धनसंयोग इति । संयोगसंबन्धेनार्द्रेन्धनमित्यर्थः एवमग्रेपि आर्द्रेन्धनसंयोगस्योपाधित्वे गौरवात् ।

तथाहि यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता । यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाऽव्यापकता । एवं साध्यव्यापकत्वे सति साधनाऽव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः । सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वाऽसिद्धम् ।

---

१ साध्यव्यापकत्वसाधनाव्यापकत्वघटकप्रतियोगितयोः एकसंबन्धावच्छिन्नत्वं बोध्यम् । तेन आलोके संयोगेन साध्यव्यापकत्वस्य सत्त्वेपि नातिव्याप्तिः । वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादिस्थलीयोद्भूतरूपाद्युपाधौ अव्याप्तिस्तुसाध्यांशे साधनांशे च एकधर्मावच्छिन्नत्वनिवेशेन परिहरणीया सच धर्म्मः प्रकृते बहिर्द्रव्यत्वम् ।

साध्यव्यापकत्वादिकमुपपादयति यत्रधूम इत्यादिना । उपसंहरति—एवमिति । इदमुपलक्षणं पर्वतो वह्निमान् नीलधूमादित्यादौ नीलत्वरूपव्यर्थ[1]विशेषणघटितधूमहेतुरपि व्याप्यत्वासिद्ध इतिबोध्यम् ।

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः । यथा वह्निरनुष्णो द्रव्यत्वादिति । अत्रानुष्णत्वं साध्यं तदभाव उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम् ।

बाधितं लक्षयति—यस्येति । साध्याभावविशिष्टपक्षो बाधः तद्वत्त्वं बाधितलक्षणम् । तमुदाहरति—यथेति । लक्षणमुपपादयति—अत्रेति ।

इति तर्कसंग्रहे अनुमानखण्डं समाप्तम् ॥

इति लघुबोधिन्याम् अनुमानखण्डं समाप्तम् ॥

---

१ स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तरघटितत्वं व्यर्थविशेषणघटितत्वम् । स्वं नीलधूमत्वादिकं तच्च न हेतुतावच्छेदकम् । स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराऽघटितस्यैव व्याप्यतावच्छेदकत्वात् ।

अथ उपमानखण्डम्।

उपमितिकरणम् उपमानम्।

अथोपमानं निरूपयति—उपमितीति। उपमितिनिरूपितकरणत्वम् उपमानस्य लक्षणम्।

संज्ञासंज्ञिसम्बन्धज्ञानम् उपमितिः।

उपमितिमाह—संज्ञेति। उपमितित्वजातिमत्त्वम् उपमितेर्लक्षणं संज्ञापदं संज्ञ्यर्थः तयोर्यः संबन्धो वाच्यवाचकभावरूपः तज्ज्ञानमुपमितिस्वरूपमित्यर्थः अस्य लक्षणत्वे कोशादिजन्ये तादृशज्ञानेतिव्याप्तिः।

तत्करणं सादृश्यज्ञानम्। अतिदेशवाक्यार्थस्मरणम् अवान्तरव्यापारः।

तत्करणं सादृश्यज्ञानमिति। अयं गोसदृश इति। गवये गोसादृश्यज्ञानं करणं गोसदृशे गवयपदवाच्य इत्य-

---

१ यदि उपमितेः उपमितित्वरूपजातिलक्षणाङ्गीकारे पूर्ववत् उपनयवाक्यजन्यशाब्दबोधाऽनुपपत्तिरिति ब्रूयात् तदा इहाऽपि सादृश्यज्ञानकरणकवृत्त्यनुभवत्वव्याप्यजातिमत्त्वम् लक्षणमवसेयम्।

२ गवयानुयोगिकगोप्रतियोगिकसादृश्यप्रत्यक्षं करणमित्यर्थः।

तिदेशवाक्यार्थस्मरणं व्यापारः तादृशज्ञानं प्रति सादृश्य-ज्ञानस्य संस्कारोद्बोधकविधया कारणत्वेन तस्य सादृश्यज्ञा-नजन्यत्वात् । उपमितिजनकत्वाच्च व्यापारलक्षणं स्थितं तज्जन्यम्. अयं गवयपदवाच्य इति ज्ञानमुपमितिः ।

तथाहि । गवयशब्दवाच्यमजानन्कुतश्चि-दारण्यकपुरुषाद्गोसदृशो गवय इति श्रुत्वा-वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति ।

एतदुपपादयति—तथाहीति । गोसदृशो गवय इति श्रुत्वेति । तादृशवाक्यज्ञानजन्यगोसादृश्यविशिष्टगवयपद-वाच्यत्वज्ञानवान् भूत्वेत्यर्थः । इदं च वाक्यार्थस्मरणरूप-व्यापारोपपादनार्थं स्मरणं प्रत्यनुभवस्य संस्कारद्वारा हेतु-त्वात् । वाक्यार्थं स्मरन्निति । स्मरिष्यन्नित्यर्थः यथा श्रुते शतृप्रत्ययस्य वर्तमानकालार्थकतया सदृशपिण्डदर्श-

१ ननु सादृश्यविशिष्टपिण्डदर्शनस्य उपमानत्वे अतिदे-शवाक्यार्थस्मरणस्य तद्व्यापारत्वाऽनुपपत्तिः । तज्जन्यत्वे सति तज्जन्यजनकस्यैव व्यापारत्वात् । स्मरणस्य च स्वसमानप्र-कारकानुभवजन्यत्वनियमादिति मूलोक्तमतिदेशस्मरणस्य व्यापारत्वमसङ्गतमित्याशङ्कां निराकुरुते—तादृशेत्यादिना । तथाच अतिदेशवाक्यार्थस्मरणस्य पूर्वतनशाब्दबोधजन्यत्वेपि तत्रोद्बोधकविधया तादृशपिण्डदर्शनमपि कारणमेवेति नानु-पपत्तिरिति भावः ।

न वाक्यार्थस्मरणयोः समानकालिकत्वं ज्ञायते तन्न संभवति अतिदेशवाक्यार्थस्मरणस्य सादृश्यज्ञानजन्यत्वेन सादृश्यज्ञानस्य पूर्ववृत्तित्वनियमात् ।

तदनन्तरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते ।

तदनन्तरमिति । वाक्यार्थस्मरणविशिष्टसादृश्यज्ञानोत्तरक्षणे इत्यर्थः । इत्युपमितिरुत्पद्यत इति । गवयविशेष्यकगवयपदवाच्यत्वप्रकारकज्ञानरूपोपमितिरुत्पद्यत— इत्यर्थः । केचित् अतिदेशवाक्यार्थविषयं तादृशवाक्यजन्यं ज्ञानमुपमितिकरणं तत्स्मरणं व्यापारः स्मरणस्यानुभवजन्यत्वेन व्यापारलक्षणसत्त्वादित्याहुः ।

इति तर्कसंग्रहे उपमानखण्डं समाप्तम् ॥

इति लघुबोधिन्याम् उपमानखण्डं समाप्तम् ॥

अथ शब्दखण्डम् ।

आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता ।

अथ शब्दं निरूपयति—आप्तवाक्यमिति । शब्द इति । शब्दप्रमाणमित्यर्थः इदमाचार्यमताभिप्रायेण वस्तुतस्तु तादृशवाक्यज्ञानमेव करणम् अन्यथा मौनिश्लोकादौ वाक्याभावेन शाब्दबोधानापत्तेः । आप्तलक्षणमाह— आप्तस्त्विति । यथार्थवक्तेति । प्रकृतवाक्यार्थगोचरय-

थार्थज्ञानवानित्यर्थः तादृशज्ञानवत्त्वं लक्षणं तदुच्चरितवाक्यत्वं शब्दप्रमाणलक्षणं लाघवात्तादृशयथार्थज्ञानजन्यवाक्यत्वं लक्षणं बोध्यम् ।

वाक्यं पदसमूहः । यथा गामानयेति ।

वाक्यलक्षणमाह—पदसमूह इति । पदसमूहलक्षणमुदाहरति—यथेति । गोपदाम्पदआङ्पूर्वकनीपदलोट्पदरूपसमुदायरूपत्वाद्वाक्यमित्यर्थः ।

शक्तं पदम् । अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः ।

पदलक्षणमाह—शक्तमिति । शक्तिनिरूपकत्वं लक्षणमित्यर्थः । शक्तिं प्रदर्शयति—अस्मादिति । पञ्चम्यर्थो जन्यत्वं तस्य बोद्धव्यशब्दार्थबोधेऽन्वयः ईश्वरसंकेत ईश्वरेच्छा । तथा चायमर्थः एतत्पदजन्यबोधविषयो भूयादितीश्वरेच्छा शक्तिरित्यर्थः अर्थस्मृत्यनुकूलव्यापारत्वं[1] तल्लक्षणं स्मृतिपदं च स्मृतिविशेषपरं सच शाब्दबोधानुकूलो

---

१ शाब्दबोधजनकार्थस्मृत्यनुकूलत्वे सति घटादिपदघटादिरूपार्थयोः संबन्धरूपव्यापारत्वमित्यर्थः । अनुकूलत्वंच प्रयोजकत्वं तच्च कारणतावच्छेदके पदपदार्थसंबन्धेप्यक्षतं घटादिपदतदर्थयोरन्यसंबन्धवारणाय अनुकूलान्तम् इतरसंबन्धज्ञानस्य अर्थस्मृतिजनकत्वेपि शाब्दबोधजनकस्मृतिजनकत्वाभावात् । अर्थस्मृत्यनुकूलत्वस्य अदृष्टादौ सत्त्वादतिप्रसङ्गः अतो विशेष्यम् ।

ग्राह्यः शाब्दबोधं प्रति हि पदज्ञानं करणं वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थस्मृतिर्व्यापारः तादृशस्मृत्यनुकूलत्वाच्छक्तिलक्षणान्यतररूपवृत्तेर्लक्षणसंगतिः लक्षणायामतिव्याप्तिवारणाय लक्षणान्यत्वेसतीति विशेषणीयम्। शक्यसंबन्धो[1] लक्षणा सा चान्वयाऽनुपपत्तितः कल्प्यते यथा गङ्गायां घोष इत्यत्र घोषस्य गङ्गाशब्दार्थप्रवाहे वृत्तित्वाऽसंभवात् तीरे लक्षणा गङ्गातीरवृत्तिर्घोष इति वाक्यार्थः। सा च द्विविधा[2] जहल्लक्षणाऽजहल्लक्षणा चेति यत्र शक्यार्थपरित्यागेन लक्ष्यार्थबोधस्तत्र जहल्लक्षणा यथा मञ्चाः क्रोशन्तीत्यत्र मञ्चानां क्रोशनकर्तृत्वाऽसंभवात् मञ्चशब्दस्य पुरुषे लक्षणा पुरुषाः क्रोशन्तीत्यर्थः अत्र मञ्चशक्यार्थभूतमञ्चानां परित्यागाज्जहल्लक्षणा। द्वितीया यथा काकेभ्यो दधि रक्ष्यतामित्यादौ मार्जारादिभ्योपि दधिरक्षणे तात्पर्यात् काकपदस्य दध्युपघातके लक्षणा दध्युपघातकेभ्यो दधि

---

१ सच संबन्धः क्वचित् साक्षात् क्वचित् परम्परया। "अग्निर्माणवकः" इत्यादौ शक्यस्य अग्नेः स्वनिष्ठशुचित्ववत्त्वरूपपरम्परासंबन्धो ज्ञेयः।

२ दीपिकादौ लक्षणायाः त्रिधा विभागः परमताभिप्रायेण। दिनकर्यादिग्रन्थे लक्षणायाः द्वैविध्यप्रतिपादनात् इहापि द्वैविध्येन विभागः। लक्षितलक्षणायास्तु जहत्स्वार्थायामेव अन्तर्भावः। साच "द्विरेफं पश्य" इत्यादौ स्ववाच्यरेफद्वयघटितपदवाच्यत्वादिरूपा भ्रमरादौ बोध्या।

रक्ष्यतामित्यर्थः । अत्र दध्युपघातकेषु काकानामप्यन्वयादजहल्लक्षणा । ननु काकानामन्वयानुपपत्त्यभावात्कथं लक्षणास्वीकार इति चेन्न तात्पर्यानुपपत्तेरपि लक्षणाबीजत्वात् मञ्चाः क्रोशन्तीत्यादौ यदा मञ्चस्थपुरुषाः क्रोशन्तीति बोधस्तदा तत्रापि अजहल्लक्षणैव ।

आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः ।

ननु यदि पदज्ञानं वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिद्वारा शाब्दबोधजनकं तदा घटः कर्मत्वमानयनं कृतिरित्यादौ शाब्दबोधापत्तिः तत्र घटादिपदज्ञानस्य वृत्ति ज्ञानसहकृतघटादिपदज्ञानजन्यपदार्थोपस्थितिरूपव्यापारसाहितस्य सत्त्वादित्यत आह—आकाङ्क्षेति । आकाङ्क्षादिज्ञानं वाक्यार्थज्ञानहेतुरित्यर्थः । यथाश्रुते घटः कर्मत्वमित्यादावाकाङ्क्षादिभ्रमात् शाब्दबोधानुपपत्तिः ।

पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाऽननुभावकत्वमाकाङ्क्षा ।

आकाङ्क्षामाह—पदस्येति । पदस्य यत्पदस्य । पदान्तरव्यतिरेकप्रयुक्तेति । यत्पदव्यतिरेकप्रयुक्तेत्यर्थः । अन्वयाऽननुभावकत्वमिति । यादृशान्वयबोधजनकत्वाभाव इत्यर्थः । आकाङ्क्षेति तत्पदस्य तत्पदवत्त्वं ता-

दृशान्वयबोधे आकाङ्क्षेत्यर्थः घटमानयेत्यत्र अमूपदार्थः[1] कर्मत्वं तत्र घटपदार्थघटस्य निष्ठतासंबन्धेनान्वयः आङ्पूर्वकनीधातोरानयनमर्थः तत्र कर्मत्वस्य निरूपितत्वसंबन्धेनान्वयः आख्यातस्य कृतिरर्थः[2] तत्रानयनस्यानुकूलतासंबन्धेनान्वयः तस्या आश्रयतासंबन्धेन पुरुषेऽन्वयः तथाच घटनिष्ठकर्मतानिरूपितानयनानुकूलकृतिमान् पुरुष इति शाब्दबोधः[3] अत्र घटपदस्य अमूपदव्यतिरेके निरुक्तशाब्दबो-

---

१ अथ द्वितीयायाः कर्मत्वार्थकत्वे धर्मिशक्तिबोधक "कर्मणिद्वितीया" इतिसूत्रविरोधः इति चेन्न "समर्थः पदविधिः" इति सूत्रभाष्ये क्रियाकारकयोः संबन्धवाचिका द्वितीया भवतीति वचनेन द्वितीयादिविभक्तेः कर्मत्वादिरूपधर्मवाचित्वावगमेन "कर्मणिद्वितीया" इति सूत्रस्थकर्मादिपदस्य कर्मत्वादिरूपपरतायां विरोधाऽभावात् । "यथोत्तरं मुनीनां प्रामाण्यम्" इति न्यायेन भाष्यविरोधे सूत्रस्यैव अन्यथा नेयत्वात् ।

२ कृतित्वजातेः शक्यतावच्छेदकत्वे लाघवादिति भावः । नच आख्यातेन कर्तुरनभिधानात् चैत्रो गच्छतीत्यादौ चैत्रपदोत्तरं तृतीयापत्तिरिति वाच्यम् कर्तृगतसंख्याऽनभिधानस्य तृतीयायां तन्त्रत्वात् ।

३ प्रथमान्तार्थमुख्यविशेष्यक इति शेषः । वैय्याकरणतमे तु अमूपदार्थः कर्म आनयनं व्यापारश्च धात्वर्थः आख्यातार्थाः कर्तृकालसंख्याः तत्र घटस्य अभेदसंबन्धेन कर्मण्यन्वयः तस्यच आधेयतासंबन्धेन आनयने अन्वयः आनयनस्य अनुकूलतासंबन्धेन व्यापारे अन्वयः अध्याहृतत्वमितिपदार्थस्य—

धजनकत्वाभावः अतो घटपदस्याम्पदवत्त्वं निरुक्तशाब्द-बोधे आकाङ्क्षा एवंच घटः कर्मत्वमित्यादौ घटपदस्य नहि कर्मत्वपदव्यतिरेकप्रयुक्तः शाब्दबोधजनकत्वाभाव इति न तयोराकाङ्क्षेति तत्राकाङ्क्षाभावान्न शाब्दबोध इति भावः।

अर्थाबाधो योग्यता।

योग्यतामाह—**अर्थाबाध** इति। अर्थस्याऽबाधः संबन्धाभाव इत्यर्थः। **योग्यतेति**। वाक्यार्थज्ञानहेतु-ज्ञानविषययोग्यतेत्यर्थः वह्निना सिञ्चेदित्यादौ सेचने वह्नि-करणकत्वसंबन्धरूपयोग्यताविरहान्न तत्र शाब्दबोधः।

पदानामविलम्बेनोच्चारणं सन्निधिः।

सन्निधिमाह—**पदानामि**ति। **अविलम्बेनोच्चारण-**

—अभेदसंबन्धेन एकत्वसंख्यायाः समवायसंबन्धेनच कर्तरि अन्वयः कर्तुः कालस्यच आधेयतासंबन्धेन व्यापारे अन्वयः तथाच त्वदभिन्नैककर्तृकः घटाभिन्नकर्मकवर्तमानकालिको व्यापारः इति बोधः सच “ प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानम्” इति यास्कस्मृतिविरोधान्न प्रमाणपदवी-मनुसरति। कथंचित् स्मृतिसंकोचाङ्गीकारे दूषणाभिधानमन्यत्र द्रष्टव्यमिति दिक्।

१ यत्पदार्थेन समं यत्पदार्थस्यान्वयः तात्पर्यविषयः तयोः पदयोरव्यवधानं सान्निधिरित्यर्थः। तदुपस्थितिश्च शा-ब्दबोधे कारणम्। यथाश्रुते तु गिरिर्भुक्तम् वह्निमान् देवद-त्तेनेत्यादौ गिरिपदभुक्तपदयोरव्यवधानसत्त्वादतिव्याप्तिः। एवं सति गिरिपदार्थभुक्तपदार्थयोरन्वयो न तात्पर्यविषयः। अ-पितु गिरिपदार्थाभिमतपदार्थयोरेवेति तयोरव्यवधानाभावात् नातिव्याप्तिः।

मिति। अव्यवहितोच्चारणमित्यर्थः तथाच प्रहरेप्रहरे उच्चरिते गामानयेत्यादिवाक्ये सन्निध्यभावात् शाब्दबोधाभावः।

आकाङ्क्षादिरहितं वाक्यम् अप्रमाणम्। यथा गौरश्वः पुरुषो हस्तीति न प्रमाणम् आकाङ्क्षाविरहात्। अग्निना सिञ्चेदिति न प्रमाणं योग्यताविरहात्। प्रहरे प्रहरे असहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं सान्निध्याभावात्।

एतदुपपादयति—आकाङ्क्षादीति। गौरश्वइति। अत्र शाब्दबोधजनकत्वाभावो न्ह्येकपदस्य पदान्तरव्यतिरेकप्रयुक्त इति आकाङ्क्षानास्तीति भावः।

वाक्यं द्विविधम्। वैदिकं लौकिकं च। वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणम्। लौकिकं त्वाप्तोक्तं प्रमाणम्। अन्यदप्रमाणम्। वाक्यार्थज्ञानं शाब्दज्ञानम्। तत्करणं शब्दः।

वाक्यं विभजते वाक्यं द्विविधमिति। ईश्वरोक्तत्वा-

---

१ यत्पदाभावप्रयुक्तम् अन्वयबोधाजनकत्वम् तत्पदसमभिव्याहृततत्पदत्वरूपमाकाङ्क्षा प्रकृते नास्ति। प्रयुक्तत्वंच कारणाभावात् कार्याभावः इति प्रतीतिसिद्धः स्वरूपसंबन्धविशेषः।

त्सर्वमेव प्रमाणमिति। ईश्वरस्य सर्वज्ञत्वेन भ्रमाद्यसंभवेनाप्तत्वादितिभावः अन्यत् अनाप्तोक्तम् । उक्तमुपसंहरति—वाक्यार्थज्ञानमिति ।

अयथार्थानुभवस्त्रिविधः। संशयविपर्ययतर्कभेदात् ।

अयथार्थानुभवं विभजते—अयथार्थानुभव इति ।

एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः। यथा स्थाणुर्वा पुरुषो वेति ।

संशयस्य लक्षणमाह—एकस्मिन्निति।धर्मिणीतिसप्तम्यर्थो विशेष्यत्वम् । विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानमिति। विरुद्धनानाधर्मप्रकारकज्ञानमित्यर्थः। संशय इति लक्ष्यनिर्देशः एकधर्मिविशेष्यकत्वे सति विरुद्धनानाधर्मप्रकारकज्ञानत्वं संशयस्य लक्षणं पर्वतो वह्निमान्—ह्रदो-वह्न्यभाववानिति ज्ञानेतिव्याप्तिवारणायैकेति पर्वतो वह्न्यभावविरुद्धवह्निमानिति ज्ञानेऽतिव्याप्तिवारणाय नानेति पर्वतो वह्निमान्—द्रव्यं चेति ज्ञानेऽतिव्याप्तिवारणाय विरुद्धेति। नचैवमपि पर्वतो वह्निमान्—ह्रदो वह्न्यभाववानिति ज्ञानेऽतिव्याप्तितादवस्थ्यं तत्रैकस्य धर्मिणः पर्वतादेर्विशेष्यत्वादिति वाच्यम् एकधर्मिविशेष्यकत्वावच्छिन्नविरुद्ध[1]नाना-

---

१ विरुद्धत्वंच एकाधिकरणावृत्तित्वमिह बोध्यम् ।

नाधर्मप्रकारकत्वस्य विवक्षितत्वात् नहि तादृशज्ञाननिष्ठं वह्नितदभावरूपनानाधर्मप्रकारकत्वं पर्वतादिरूपैकधर्मिविशेष्यकत्वावच्छिन्नं ययोर्विषयतयोर्निरूप्यनिरूपकभावस्तन्निरूपितविषयितयोरवच्छेद्यावच्छेदकभाव इति नियमेन पर्वतनिष्ठविशेष्यतायाः वह्न्यभावनिष्ठप्रकारतायाश्च निरूप्यनिरूपकभावाऽभावात् वह्न्यभावप्रकारकत्वस्य पर्वतविशेष्यकत्वावच्छिन्नत्वाभावात् एवं वह्निप्रकारकत्वस्य ह्रदविशेष्यकत्वावच्छिन्नत्वाभावाच्चातिव्याप्त्यप्रसक्तेः। संशयमुदाहरति—यथेति । अत्र पुरोवर्त्तिनि स्थाणुत्वस्थाणुत्वाभावपुरुषत्वतदभावानां संशयः ।

मिथ्याज्ञानं विपर्ययः। यथा शुक्ताविदं रजतमिति ।

विपर्य्ययमाह—मिथ्याज्ञानमिति । तदभाववति तत्प्रकारकनिर्णयं[1] इत्यर्थः । तमुदाहरति यथेति ।

व्याप्यारोपेण व्यापकारोपस्तर्कः । यथा यदि वह्निर्न स्यात्तर्हि धूमोपि न स्यादिति ।

तर्कमाह— व्याप्यारोपेणेति । व्याप्यारोपः आहार्यज्ञानम् । बाधकालिकेच्छाजन्यज्ञानम्।तदापाद्यव्यापकारो-

---

१ निर्णयत्वंच न तावत् तदभावाऽप्रकारकत्वे सति तत्प्रकारकज्ञानत्वरूपम् । अपितु विशेषणविशेष्यभावाऽनापन्नविरुद्धकोटिद्वयप्रकारकज्ञानाऽन्यज्ञानत्वम् ।

पस्तर्कः । यथा वह्निर्नस्यादिति । अत्र व्यह्नयभावव्याप्यस्यारोपेण व्यापको धूमाभाव आरोप्यते अयं विशेषशोधकस्तर्कः । व्यभिचारस्तु संशयनिवर्तकः । यदि धूमो वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो नस्यादिति । अत्रापि वह्निव्यभिचारित्वं वह्निजन्यत्वाभावव्याप्यमिति ।

स्मृतिरपि द्विविधा । यथार्था अयथार्था च । प्रमाजन्या यथार्था । अप्रमाजन्या अयथार्था ।

स्मृतिं विभजते—स्मृतिरपीति । यथार्थामाह—प्रमाजन्येति । प्रमाजन्यसंस्कारजन्येत्यर्थः एवमग्रेपि । अयथार्थामाह—अप्रमाजन्येति ।

सर्वेषामनुकूलवेदनीयं सुखम् । प्रतिकूलवेदनीयं दुःखम् । इच्छा कामः । क्रोधो द्वेषः । कृतिः प्रयत्नः ।

सुखस्वरूपमाह—सर्वेषामिति । अनुकूलतयेति तृतीयार्थः प्रकारकत्वम् अनुकूलत्वप्रकारकवेदनविषयमित्यर्थः । लक्षणन्तु[१] अहंसुखीत्यादि प्रत्यक्षसिद्धदुःखत्वजातिमत्त्वम् । एवमुत्तरत्रापि लक्षणं बोध्यम् ।

---

१ अनुकूलत्वप्रकारकवेदनविषयत्वस्य लक्षणत्वे परद्रव्योपभोगादिजन्यसुखे साधूनां द्वेषदर्शनादव्याप्तेरित्यत आह—लक्षणमिति ।

विहितकर्मजन्यो धर्मः । निषिद्धकर्मजन्यस्त्व धर्मः । बुद्ध्यादयोष्टौ आत्ममात्रविशेषगुणाः । बुद्धीच्छाप्रयत्ना द्विविधाः । नित्या अनित्याश्च । नित्या ईश्वरस्य । अनित्या जीवस्य ।

विहितेति । यजेतेत्यादिना विहितयागादिकर्मजन्य इत्यर्थः । निषिद्धेति । मा हिंस्यादिति निषिद्धहिंसादिकर्मजन्य इत्यर्थः । इदमेवादृष्टमित्युच्यते तच्च क्षणभङ्गुरयागहिंसादिकर्मणां कालान्तरदेशान्तरभाविस्वर्गनरकादिरूपसुखदुःखसाधनत्वासंभवात् कर्मव्यापारतया कल्प्यते । तद्विचारस्त्वन्यत्र द्रष्टव्यः । बुद्ध्यादीनामाश्रयमाह—बुद्ध्यादय इति । तत्र बुद्धीच्छाप्रयत्नानां द्वैविध्यमाह बुद्धीति ।

संस्कारस्त्रिविधः । वेगो भावना स्थितिस्थापकश्चेति । वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः । अनुभवजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः । अन्यथाकृतस्य पुनस्तादवस्थ्यापादकः स्थितिस्थापकः । कटादिपृथिवीवृत्तिः ।

संस्कारं विभजते—संस्कारमिति । वेगाद्यन्यतमत्वं संस्कारसामान्यस्य लक्षणम् । वेगस्याश्रयमाह—वेगइति । भावनां लक्षयति—अनुभवजन्येति । अनुभवध्वंसे

ऽनुभवे चातिव्याप्तिवारणाय दलद्वयम् । स्थितिस्थापकमा-
-अन्यथा कृतस्येति । पूर्वावस्थाविजातीयावस्थाविशि-
ष्टस्य पूर्वावस्थासंपादक इत्यर्थः ।

चलनात्मकं कर्म । ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम् । अधोदेशसंयोगहेतुरपक्षेपणम् । शरीरस्य सन्निकृष्टसंयोगहेतुराकुञ्चनम् । विप्रकृष्टसंयोगहेतुः प्रसारणम् । अन्यत्सर्वं गमनम् । पृथिव्यादिचतुष्टयमनोमात्रवृत्ति ।

कर्मस्वरूपमाह— चलनात्मकमिति । उत्क्षेपणादीनां स्वरूपमाह—ऊर्ध्वदेशेत्यादिना । अन्यत्सर्वम् । भ्रमणरेचनादि ।

नित्यमेकमनेकानुगतं सामान्यम् । द्रव्यगुणकर्मवृत्ति । तद्द्विविधं परापरभेदात् । परं सत्ता । अपरं जातिर्द्रव्यत्वादि ।

सामान्यलक्षणमाह—नित्यमिति । एतत्तु पूर्वोक्तम् । तस्याश्रयमाह—द्रव्येति । तस्य द्वैविध्यमाह—परमिति । अधिकदेशवृत्तित्वं परत्वम् अल्पदेशवृत्तित्वम् अपरत्वं सत्तायाः द्रव्यादित्रिकवृत्तित्वेन सर्वजात्यपेक्षया परत्वं घटत्वादीनां सत्तापेक्षया अल्पदेशवृत्तित्वादपरत्वम् द्रव्यत्वादीनांतु घटत्वाद्यपेक्षया परत्वम् सत्तापेक्षया अपरत्वम् ।

नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः। नित्यसम्बन्धः समवायः। अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति।

विशेषानाह— नित्यद्रव्यवृत्तय इति। व्यावर्तका इति। स्वतः इतरभेदानुमापका इत्यर्थः। समवायमाह नित्यसम्बन्ध इति। आश्रयमाह—अयुतसिद्धवृत्तिरिति। अयुतसिद्धस्वरूपमाह—ययोर्द्वयोरिति। कपालावयवक्रिया ततो विभागः अनन्तरं कपालारम्भकसंयोगनाशे कपालनाश इति तदानीं कपालद्वयसंयोगस्य विद्यमानत्वाद्दोषवारणाय अविनश्यदवस्थमिति। अयुतसिद्धौ दर्शयति—अवयवाऽवयविनाविति।

अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य। सादिरनन्तः प्रध्वंसः। उत्पत्त्यनन्तरं कार्यस्य। त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः। यथा भूतले घटो नास्तीति। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः। यथा घटः पटो न भवतीति।

प्रागभावं लक्षयति—अनादिरिति । अत्यन्ताभावेऽतिव्याप्तिवारणाय सान्तेति पटादावतिव्याप्तिवारणाय अनादिरिति । तमुदाहरति—उत्पत्तेरिति । इह घटो भविष्यति इति प्रतीतिविषयः प्रागभाव इत्यर्थः । प्रध्वंसाभावं लक्षयति—सादिरिति । उदाहरति—उत्पत्त्यनन्तरमिति । अत्यन्ताभावं लक्षयति—त्रैकालिकेति। त्रैकालिकत्वे सति तादात्म्यातिरिक्तसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं लक्षणम् । तमुदाहरति—यथेति । संयोगेन भूतले घटो नास्तीत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकाभावः प्रतीयते । अन्योन्याभावं लक्षयति—तादात्म्येति । तमुदाहरति—यथा घटः पटो न भवतीति । संयोगसम्बन्धव्यावर्त्या प्रतियोगिता ।

सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात्सप्तैव पदार्था इति सिद्धम् ।

अत्रषोडशपदार्थानामुक्तत्वात्कथं सप्तैव पदार्था इत्य-

---

१ नञा अत्यन्ताभावबोधने प्रतियोग्यनुयोगिवाचकपदयोः सप्तम्यन्तप्रथमान्तत्वनियमः ।

२ नञा अन्योन्याभावबोधने प्रतियोग्यनुयोगिवाचकपदयोः प्रथमान्तत्वनियमः ।

३ "प्रमाणप्रमेय—" इत्यादिसूत्रे उक्तत्वादित्यर्थः ।

त्राह—सर्वेषामिति । अन्तर्भावप्रकारस्त्वन्यत्राऽनुसन्धेयः ग्रन्थकरणप्रयोजनं ख्यात्यर्थम् ।

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रहः ॥

स्वनाम चाह—कणादेतिश्लोकेन । न्यायमते न्यायेन गौतममतं विवक्षितम् बालाः तदनभिज्ञा इति अस्यबालव्युत्पत्तिरेव प्रयोजनमिति सिद्धम् ॥

इति अन्नम्भट्टविरचितस्तर्कसंग्रहः संपूर्णः॥१॥

इति पदवाक्यप्रमाणज्ञगोवर्धनपीठाधिकृतश्रीवृन्दावननिवासिश्रीरङ्गदेशिकप्रणीता लघुबोधिनी समाप्तिमगमत् ॥

---

१ दीपिकादौ ।

समाप्त.

गंगाविष्णु श्रीकृष्णदास
लक्ष्मीवेंकटेश्वर छापाखाना
कल्याण—(मुंबई)

लक्ष्मीवेङ्कटेश्वराय नमः ।

कोकिलाव्रतमाहात्म्यस्य

अथवा

(अधिकाषाढमासमाहात्म्यस्य)

सूचनापत्रम् ।

इह तावद्ब्रह्माण्डान्तर्वर्तिनवखण्डभूमण्डलशिखण्डीभूतकर्मकाण्डस्थलभरतखण्डे स्ववर्णाश्रमधर्माचरणश्रद्धावतां जनानाम् इहामुत्रेष्टफलावाप्तिसाधनानि नित्यनैमित्तिककाम्यानि नानाव्रतकर्मादीनि प्रसिद्धानि सन्ति । तथैव तत्तद्व्रतादिविधिप्रतिपादकव्रतार्कव्रतराजादयोपि ग्रन्थाः प्रसिद्धाः । तेषु स्त्रीणां जन्मनि जन्मान्तरेच सौभाग्यादिप्रियपोगभोगदं कोकिलानामकं व्रतं तद्देवतार्चनोद्यापनादिविधिस्तदितिहासश्च कथितोस्ति खलु । तथापि स संक्षिप्त एव । अतो मया बहुप्रयत्नतः कस्यचित् विद्वद्भिमस्य सकाशात् स्कन्दपुराणान्तर्गतकनकाद्रिखण्डस्थैकत्रिंशदध्यायात्मकं शिवनारदसंवादरूपं साद्यन्तं मनोरमं कोकिलाव्रतोत्पत्तिहेतुभूतं दग्धदेहपार्वत्याः कोकिलाजन्मप्राप्तिकथोपबृंहितं कोकिलामाहात्म्यं

सूचना।

समाहृत्य शास्त्रिभिः शोधयित्वा सटिप्पणम् कारयित्वा च अस्मल्लक्ष्मीवेङ्कटेश्वराख्येङ्कनयन्त्रे सुललितसीसकाक्षरैर्मुद्रितमस्ति । यस्मिन् वर्षेऽधिकाषाढस्तास्मिन्नेव वर्षे शुद्धाषाढपूर्णिमामारभ्य मासपर्यन्तं प्रत्यहं स्नानदानार्चनमाहात्म्यश्रवणविधियुक्तकोकिलाव्रताचरणं स्त्रीभिःकार्यमित्युक्तम्। स व्रताचरणकालोऽस्मिन्नेव वर्षेऽधिकाषाढप्राप्ते-रागन्तेति संप्रत्यैवैतन्माहात्म्योपयोगः सर्वासां व्रताचरणशीलानां सम्यग् भविष्यतीति ज्ञात्वा झटिति संमुद्र्य प्रकाशितम्।तस्मात् मन्मुद्रणायासम् आस्तिकग्राहकाः सफलीकुर्वन्त्विति सविनयेयं मत्प्रार्थना । ग्राहकाणां माहात्म्यपुस्तकानि योग्यमूल्येन मिलिष्यन्तीत्यलंविस्तरेण ।

शके १८१९

श्रीकृष्णदासात्मजो गङ्गाविष्णुः

"लक्ष्मीवेङ्कटेश्वर" मुद्रणयन्त्रम्.

कल्याण-(मुंबई.)

श्रीः।

निरुक्ति निर्वचन दो व्याख्याओंसें युक्त भगवद्गुणदर्पणाख्य विष्णुसहस्रनामभाष्यकी और विष्णुसहस्रनामदीपिकाकी तथा विष्णुसहस्रनामचंद्रिकाकी—

जाहिरखबर.

अनुष्टुप्श्लोकात्मक निरुक्तिव्याख्यासमेत और प्रकृति-प्रत्ययको दिखानेवाले पाणिनिसूत्रोंसे गर्भित ऐसी निर्वचननामक द्वितीयव्याख्यासें युक्त भगवद्गुणदर्पणनामक विष्णुसहस्रनामभाष्य और उक्त भाष्यके अनुसार विष्णुसहस्रनामका व्युत्पत्तिसहित हिंदीभाषामें दीपिका नामक ग्रंथ तथा शाङ्करभाष्यके अनुकूल विष्णुसहस्रनामका व्युत्पत्तिसहित हिंदीभाषामें चन्द्रिकानामक ग्रन्थ सो यह तीनों पुस्तकें अत्यंत सुंदर छोटे बडे अक्षरोंमें छपतेहैं तिन पुस्तकोंको जिन महाशयोंको लेनेकी और देखनेकी इच्छा हो उन्होंनें शीघ्र सूचना करना तब उक्त-पुस्तकोंको भेजनेमें उद्यत होवेंगे।

गंगाविष्णु श्रीकृष्णदास

"लक्ष्मीवेङ्कटेश्वर" छापाखाना

कल्याण—(मुंबई)

व्याख्याद्वयोपेतस्य भगवद्गुणदर्पणाख्यस्य
श्रीविष्णुसहस्रनामभाष्यस्य

प्रसिद्धिपत्रिका ।

अनुष्टुप्श्लोकात्मकनिरुक्त्याख्यव्याख्यासमेतं, नामनिर्वचनोपयोगिप्रकृतिप्रत्ययप्रदर्शकनिखिलतन्त्रप्रधानीभूतपाणिनीयस्मृतिसूत्रगर्भितनिर्वचनाख्यद्वितीयव्याख्यासमेतं च, सहृदयहृदयाह्लादकं श्रीभगवद्गुणदर्पणाख्यं श्रीविष्णुसहस्रनामभाष्यमासीत्तैलङ्गदेशाक्षरैर्द्राविडदेशाक्षरैश्च मुद्रितम्, तच्चास्मदीयदेशेऽतीवदुर्लभतरमिति मनसि निधाय सकलजनोपकृतयेऽतिप्रयासेन तैलङ्गदेशादिहानाय्य देवाक्षरैर्लेखयित्वा मुहुर्मुहुरभिज्ञजनद्वारा संशोध्य च, स्थूलसूक्ष्माक्षरैर्मनोहरं मुद्र्यते, येषां महाशयानां स्याज्जिघृक्षा, तैर्द्रुततरम् सूचना कार्या, यतस्तत्पुस्तकप्रेषणेऽहमुद्यतो भवेयमिति मे विज्ञप्तिः ।

श्रीकृष्णदासात्मजो गङ्गाविष्णुः

“लक्ष्मीवेङ्कटेश्वर” मुद्रायन्त्रम्

कल्याण—(मुंबई)

लक्ष्मीवेंकटेश्वराय नमः ।

गोविन्दराजीय भूषणाख्यया तनिश्लोक्या-ख्यया रामानुजीयाख्यया च व्याख्यया समेतस्य श्रीवाल्मीकिरामायणस्य

प्रसिद्धिपत्रिका ।

भो भो विद्यापारावारपारीणा इदं विदाङ्कुर्वन्त्वत्रभव-न्तः—तनिश्लोक्याख्ययाभूषणाख्यया रामानुजीयाख्यया च व्याख्यया समेतं श्रीवाल्मीकिरामायणम् अत्युत्तमतैलङ्ग-देशीयद्राविडदेशीयपुस्तकमालोच्य पण्डितैः संशोधितम्, तच्च सम्प्रति सुव्यक्तैःस्थूलसूक्ष्माक्षरैर्लक्ष्मीवेङ्कटेश्वरमुद्रणय-न्त्रेमुद्यते, तस्य च नागेशप्रभृतिविनिर्मिताः सन्ति यद्यपि बह्वयो व्याख्याः, तथापि सहृदयहृदयाह्लादकनानाविधाऽ पूर्वार्थान्वेषणे प्रयतमानैरार्यकुलोचितधर्ममर्यादाविचारशी-लैर्महाशयैर्निर्विशेषत्वेन सविशेषत्वेन च ब्रह्मस्वरूपप्रतिपाद-कवेदान्तवाक्यानां समीचीनतर्कसहकृतविषयभेदव्यवस्थाप-नेन तात्पर्यार्थनिर्णायकतया श्रीवाल्मीक्यभिप्रायानुगा रा-मानुजीयव्याख्या तनिश्लोकीव्याख्यासमेता भूषणाख्यव्या-ख्याऽवश्यं निरीक्षणीयेति, मन्येऽहं निरीक्षणेनाभिज्ञानाम-वश्यं जिघृक्षा भवेदिति ।

सूचयिता—श्रीकृष्णदासात्मजो गङ्गाविष्णुः

लक्ष्मीवेङ्कटेश्वर मुद्रायन्त्रम् कल्याण—(मुंबई.)

सनातनधर्मभजनमाला.

प्रथम भाग.

कलिमलग्रसित मनुष्योंका चपल चित्त भगवदाराधनमें नहीं लगता क्योंकि-इसका स्थिर और एकाग्र होना निपट असंभव है । भगवान् श्रीकृष्ण कहते हैं " तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं " अर्थात् पवन और मन दोनोंहीकी गतिका अवरोध करना बडा कठिन है । परन्तु गानविद्यामें कुछ ऐसा जादू है कि मनुष्यके चित्तपै ठगौरीसी पड जाती है । भगवान् श्रीमुखसे कहते हैं " मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ", अर्थात् गायनसमाजमें स्वयं श्रीभगवान् उपस्थित रहते हैं इसीसे हमने सनातनधर्मकी उत्कृष्ट शिक्षाद्वारा भगवद्भक्तिको उत्पन्न करनेवाले अनूठे रागरागिनी भजन गजल आदिका संग्रह कराके ये उत्तम ग्रन्थ छापा है । भजनमंडलियों और सनातनधर्मसभाओंमें इसकी हार्थोहाथ खूब बिक्री होरही है । इसके सभी पद बडे मार्केके हुए हैं । मू० ६ आना द्वितीय भागभी छपता है.

पुस्तक मिलनेका ठिकाना-
गङ्गाविष्णु श्रीकृष्णदास,
" लक्ष्मीवेंकटेश्वर " छापाखाना,
कल्याण-मुंबई.